श्री:

राजनीतिसार:

(मैथिली भाषानुवाद सहितः)

RĀJANĪTISĀRA

(A POLITICAL SYSTEM OF ANCIENT INDIA WITH TRANSLATION IN MAITHILI LANGUAGE)

By- M.M. BHAVANĀTHA UPĀDHYĀYA

सम्पा. व्याख्याकार:

डॉ० शशिनाथ झा

कामेश्वर सिंह दरभङ्गा संस्कृत विश्वविद्यालय:

दरभङ्गा

राजनीतिसार की मूल पाण्डुलिपि पत्र 7क



ग्रन्थकार भवनाथोपाध्याय की हस्तलिपि मिथिलाक्षर

From time immemorial Mithila, the land of Janaka and Yajnavalkya, Gangesha and Udayana, Shankara and Vachaspati, Bharati and Mandana, Vidyapati and Gokulanatha, Dharmadatta and Badarinatha, has been a seat of Sanskrit Learning. Kings of Mithila held Sanskrit in high esteem and extended their patronage to it.

It was in the fitness of things that Kameshwar Singh Darbhanga Sanskrit University, a living testimony to the munificence and devotion to Sanskrit Learning of the Late Maharajadhiraja Dr. Sir Kameshwar Singh K.C.I.E., D.Litt., the last ruler of Darbhanga Royal Family, was established on January 26, 1961. The late lamented Maharajadhiraja parted with his ancestral palatial building, adjoining vast campus and a huge collection of published books and rare manuscripts with a view to preserving traditional Sanskrit Learning.

The Maharajadhiraja had in his mind a plan to get the manuscripts published. The publication of the present volume is in continuation of the earlier volumes published so far by the University.

***

विश्वविद्यालय-संस्थापकः

महाराजाधिराज डॉ० सर् कामेश्वर सिंहः
(अन्तिमो मिथिलेशः। राज्यकालः—ई० 1929–1962)

आमुखम्

प्राचीनपाण्डुलिपीनां प्रकाशनयोजनायां परम-महत्त्वपूर्णस्य राजनीतिसार-ग्रन्थस्य प्रकाशनं कुर्वद्भिरस्माभिरमन्दानन्दसन्दोहः प्राप्यते। ग्रन्थोऽयं शतद्वयवर्ष- प्राचीनोऽद्यावध्यज्ञात एव सर्वैरासीत्। प्राचीनभारतीयराजनीति-शास्त्रस्य वर्तमानराजनीतौ प्राणाधायकत्वेऽपि, अनुपेक्षणीयत्वेऽपि च शास्त्रमिदमुपेक्षितमेवावलोक्यते व्यवहारेऽध्यापने च। वस्तुतस्तु प्राचीन भारतीयं ज्ञानविज्ञानादिकं सर्वं शाश्वतिकमेव, सर्वकालोपादेयमेव च। साम्प्रतं धर्मशास्त्रविषयस्याङ्गतयास्य शास्त्रस्य पाठ्यक्रमे समावेशोऽस्ति संस्कृतविश्वविद्यालयेषु,, सामान्यविश्वविद्यालयेषु तु स्नातकोत्तरवर्गे संस्कृतविषये 'नीति' वर्गः प्रामुख्येन स्वीकृतोऽस्ति। राजनीते धर्मशास्त्राङ्गत्वेन चिन्तनं स्मृतिपुराणादिषु प्राप्यते, तदनु च धर्मशास्त्रीयमहानिबन्धकारैः स्वग्रन्थानां प्रकरणतया विषयोऽयं विस्तरेण प्रपञ्चितः। तत्र कल्पतरुकारस्य म0म0 लक्ष्मीधरोपाध्यायस्य राजनीतिकल्पतरुः, गोपालभट्टाचार्यस्य राजनीतिकामधेनुः, म0म0 चण्डेश्वरठक्कुरस्य राजनीतिरत्नाकरः, म0म0 वाचस्पतिमिश्रस्य नीतिचिन्तामणिश्चेत्यादिग्रन्थाः प्रसिद्ध्यन्ति।

परन्तु विशुद्ध–(स्वतन्त्र–)राजनीतिपरम्पराया ग्रन्थाः पुरातनकालतः प्रचलिताः, स्वधाराक्रमे काले काले पूर्वोक्त–धर्मशास्त्रानुसारिग्रन्थरचनाकालेऽपि रचिताः। एतत्क्रमे पुरातनकालिकाः बार्हस्पत्यनीतिः–शुक्रनीतिः–विदुरनीतिः–कामन्दकनीतिसारः–चाणक्यनीतिः,–नीतिप्रकाशः–

नीतिशतकेत्यादयो ग्रन्था ज्ञातव्याः, अर्वाचीनाश्च पञ्चतन्त्र-हितोपदेश-पुरुषपरीक्षा-नीतिवचनामृतेत्यादयः सन्ति। एतत्क्रमे विशुद्धराजनीतिशास्त्र-ग्रन्थरूपेणाष्टादशशताब्दस्यान्ते म0म0 भवनाथोपाध्यायेन रचितो राजनीतिसारोऽल्पकलेवरोऽपि स्वगरिम्णा महत्त्वपूर्णो ग्रन्थोऽस्ति। ग्रन्थेऽस्मिन् शास्त्रमिदं सर्वाङ्गपूर्णं प्रस्तुतमस्ति। अत्र ग्रन्थकारो वचनपुष्णाणि संगृह्य स्वकीयात्यल्पवक्तव्यसूत्रेण संग्रथ्य ग्रन्थमालामिमां मनोरमां मिथिलामहीमहेन्द्राय श्रीमन्माधवसिंहाय(1775—1807 ई0) समार्पयत्।

राजनीतिसारे विंशत्यधिका ग्रन्था उद्धृता, येषु नव नीतिग्रन्था नामतो निर्दिष्टाः सन्ति। एभ्यः प्रचुराणि वचनानि गृहीतानि, परन्त्वेषु ग्रन्थेषु सप्त ग्रन्था नाममात्रेण अस्माभि र्ज्ञायन्ते—नयचन्द्रः, नयतन्त्रम्, नयप्रकाशः, नयप्रदीपः, नयलोचनम्, नयसागरः, नयसारश्चेति। ग्रन्थकारः कामन्दकनीतिसारं नाम्ना नोद्धरति, किन्तु नयचन्द्रनाम्नोद्धृतं वचनद्वयं कामन्दके द्रष्टुं शक्यते (राजनीतिसारः श्लो0—178,179 :— कामन्दके 1—10,12 इति)। एवमेव ज्ञायते यन्नयलोचनग्रन्थो नयचन्द्रस्याधार इति। अत्र शुक्रनीति—विदुरनीति—चाणक्यनीतीनामुद्धरणं नास्ति। आश्चर्यमिदं यन्मैथिलस्य चण्डेश्वरठक्कुरस्यापि स्मरणं न करोति ग्रन्थकृत्। केवलं केचन श्लोका घुणाक्षरन्यायेनोभयत्र समाना उद्धृताः सन्ति। चण्डेश्वरः षोडशतरङ्गेषु राजकीयविषयान् विस्तरेण विवृणोति, अर्थप्रदीपं, कामन्दकं, कल्पतरुं, कामधेनुम्, अर्थशास्त्रं, शुक्रनीतिं, सागरं च स्मरति। सागरो ग्रन्थविशेषो मैथिलकृतो, यतो हि 'आप्त'शब्दं ' विवृण्वता तेनोक्तम्—"आप्तैरतीष्ट-सम्बन्धिभिरिति" (राजनीतिरत्नाकरेऽष्टमतरङ्गे समुद्धृतम्)। सत्यवादी यथार्थवक्तेत्यर्थक आप्तशब्दोऽतिनिकटसम्बन्धिकेऽर्थे मैथिलीभाषायामधुनापि

प्रयुज्यते। विवेचनाधारेण चण्डेश्वरस्य कृति गुर्वी, परन्तु विषयवैशद्येन भवनाथस्यैवेत्यपि ज्ञातव्यम्। राज्यस्याविभाज्यत्वम्,प्रजपालकमात्रस्य (न तु क्षत्रियस्यैव) राज्याधिकारित्वमित्यादिविवेचनं समानमेव। राज्यकर्मणि राज्ञः कौशलं निरूपयता ग्रन्थकारेण नयलोचनीयं वचनमेकमुद्धृतं यत्र मालाकारेणौपम्यप्रदर्शमतीव चमत्कारजनकमस्ति (श्लो0 55)।

कामन्दकानुसारं नीतिशास्त्रस्य चत्वारो विभागाः सन्ति– (1) अर्थशास्त्रं, (2) दण्डनीतिः, (3) धर्मनीतिः, (4) राजनीतिश्चेति। तत्र प्रथमे कौटिल्यम् अर्थशास्त्रं, द्वितीये विवाद–व्यवहार–दण्डविषयका ग्रन्थाः, तृतीये चाणक्य–भर्तृहरिप्रभृतिप्रणीतनीतिवचनानि, चतुर्थे च राजनीतिग्रन्थाः समायान्ति।

वाल्मीकिरामायणस्य नीति–राजनीतिविषयकाणि सकलवचनानि संगृह्य "प्राचेतस राजशास्त्र" नाम्ना प्रकाशनं कुवन्ति परमसम्मान्या महाकवयः पं0 श्री सुरेन्द्र झा 'सुमन' महाशयाः। मन्ये, राजनीतिशास्त्रस्य स आकरग्रन्थः स्यात्।

राजनीतिसारस्य सम्यक् सम्पादनं मैथिलीभाषानुवादञ्च विधाय विद्वद्वर्य श्रीशशिनाथ झा शर्मा राजनीतिशास्त्रस्य सर्वोपादेयता-सम्पादनाय अग्रेसरो वर्तते। ग्रन्थस्यास्य मूलमातृका बिहारराष्ट्रभाषापरिषदि, पाटलिपुत्रे मिथिलाक्षरमयी वर्तते, यस्याः प्रतिलिपीकरणसौविध्यदानेन तन्निदेशका धन्यवादार्हाः सन्ति। मन्ये, राजनीतिज्ञा एतदनुसृत्यात्मानं देशञ्च पावयिष्यन्तीति शम्।

01.01.2000 ई0 काशीनाथ मिश्रः

कामेश्वर सिंह दरभङ्गा संस्कृत विश्वविद्यालयः,दरभङ्गा कुलपतिः

राजनीतिसारस्य विषयसूची

विषयः	श्लोकसंख्या	विषयः	श्लोकसंख्या
नीतिशास्त्रावतरणम्	1–4	मन्त्रणा	42–49
दुर्गस्थानम्	5, 6	मन्त्रभेदः	50–54
सूत्रधारः	7–9	दण्ड–पुरस्कारादि	55
प्रकृतिः	10–12	कपटम्	56–58
पुरं मन्त्री च	13–16	मित्रपरीक्षा	59–60
बहुमन्त्रिणः	17	संघशक्तिः	61–62
मन्त्रिगुणाः	18–20	जयाजयदोषाः	63–64
नियोगिनः	21	इष्टसंशये प्रवृत्तिः	64
राजा	22	गुप्तचरः	65–72
प्रतीहारः	23	गुप्तलेखः	73–76
दूतः	24	अकारणतिरस्कारनिषेधः	77
वैद्यः	25, 26	परसम्पन्न सोढव्या	78, 79
सेनापतिः	27	राज्ञो विरुद्धं समक्षे न वदेत्	80
सूपकारः	28	बलिष्ठसंयमनम्	81
लेखकः	29	मुख्यविरोधिनाशनम्	82–89
पुरोहितः	30	मन्त्ररक्षणम्	90
अधिकारपात्रता	31–33	आकाशप्रश्नः	91
राजगुणाः	34	तद्दर्शने वर्ज्यावर्ज्यचराः	92–93
उपायाः	35–36	अनाहूतगमननिषेधः	94
त्रिवर्गो नयः	37	राज्ञो विषये मन्त्रिणो	
त्याज्याः	38–41	वर्तनम्	95–108

विषयः	श्लोकसंख्या
विषकन्या प्रयोगः	109
पुनर्मन्त्रः	110–112
विधिनिषेधौ	113
अतिविश्वासःत्याज्यः	114–115
अतितीक्ष्णतातिमृदुता च त्याज्या	116–118
मूर्खो न नियोज्यः	119–121
अतिक्रोधी त्याज्यः	122
स्थिरचित्तता	123
कदाचित् कौतुकग्रहोऽपि	124
राजाज्ञाभङ्गो न कार्यः	125
शिष्टविरोध–परिहारः	126
निष्प्रयोजनकर्मनिषेधः	127
राज्ञःकटुभाषणादिनिषेधः	128–130
अवसरवादिता	131–132
बलवति सेवादिनानुप्रवेशः	133
नृपाद् भेतव्यम्	134–138
राजतोऽधिकवेषादि नोचितम्	139
सचिवसौहार्दम्	140–144
कृतककलहः	145–46
मन्त्रिपुरस्कारः	147
निष्प्रयोजनमाह्वानत्यागः	148
राजाज्ञा गरीयसी	149

विषयः	श्लोकसंख्या
निवेदनश्रवणम्	150–152
दानभोगौ	153
मन्त्रिणोऽत्युग्रस्वातन्त्र्यनिषेधः	154,155
राज्यानर्हाः	156–159
निदेशः	160–161
रिपौ कृतककोपः	162
आज्ञयाऽन्तःपुरप्रवेशः	163
दूतदर्शने विलम्बत्यागः	164–166
महावैरम्	167,168
राजाज्ञायां विलम्बो नोचितः	169–170
नृपगुणाः	171–175
अनुग्रहादि	176
दुर्जनोक्तिप्रकाशननिषेधः	177
प्रजारक्षणम्	178–180
राज्ञो विहारो नोपहसनीयः	181
अपराधानुसन्धाने मन्त्री	182,183
राजानं नैव कोपयेत्	184–185
राज्ञा मन्त्रिनिवेदनं नोपेक्ष्यम्	186
मन्त्रिणा सन्दिग्धं न वाच्यम्	187
युक्त्या कार्यावधारणम्	188
प्रतिज्ञा यथाकथञ्चिदपि पूरणीया	189
विजयप्रयाणम्	190–191
मन्त्रिणो गुरुत्वम्	192,193

विषयः	श्लोकसंख्या
राजमन्त्रिणो वैरम्	194
सिद्धित्रयम्	195–198
मन्त्रिणा आत्मप्रशंसा न कर्त्तव्या	199
सचिवानादरो नोचितः	200
आलस्यत्यागः	201
कलातिपातो नोचितः	202,203
निरपेक्षो न कर्त्तव्यः	204
देशकालपरामर्शः	205,206
अविचारितं न कर्त्तव्यम्	207–210
प्रत्युत्पन्नमतिमहत्त्वम्	211
मृते वीरे तद्गुणकीर्त्तनम्	212–214
मन्त्रणा सदैव	215
मित्रता	216, 217

विषयः	श्लोकसंख्या
दुष्टसैनिकशासनम्	218
कालप्रभावः	219–224
राज्ञो विरुद्धं नाचरेत्	225–228
परोपकारः	229
पौरुषापेक्षा	230
राज्ञः कर्त्तव्यम्	231–236
राज्ञो दण्डधरत्वम्	236–241
सभ्याः	242,243
आवश्यकं कठोर–शासनम्	244–247
व्यवहारनिरीक्षकाः	248–252
राजनीतिसार (मैथिली भाषानुवाद	पृष्ठ सं0 51–101
परिशिष्टम् –	
1. राजनीतिसारे चर्चिता ग्रन्थाः–ग्रन्थकाराश्च–	102–103
2. श्लोक सूची	104–108

***

भूमिका

मानवजीवनं सुव्यवस्थितं, सभ्यं, समुन्नतं, सौविध्यसम्पन्नं च कर्त्तुं नीतिशास्त्रस्यावतारः समजनि। तत्र आरम्भिककाले लोकनीति–राजनीती मिलितरूपेणैव नीतिशब्देन गृहीते। मानवानां जीवनावतारकालत एव नीतिशास्त्रमप्यायाति। तत्रास्य शास्त्रस्यादिप्रवर्त्तकौ बृहस्पति–शुक्रौ प्रसिद्धौ जातौ। बार्हस्पत्यनीति र्देवानां कृते, शौक्री नीतिश्च दानवानां कृते निर्मिता। स्मृतिग्रन्थेषु सामान्यनीतेः राजनीतेश्च स्वतन्त्रा अध्याया उपलभ्यन्ते। याज्ञवल्क्यस्मृते र्व्यवहाराध्यायः तदानीन्तनो भारतीय–संविधान– नियमो वर्तते। तदनु पुराणेषु एतद्विषयिणी प्रचुरा सामग्री विद्येते। आचार्य चाणक्यस्य नीतिश्लोकाः, कौटिल्यमर्थशास्त्रं च राजनीतेः चरमोत्कर्षसूचनां ददति। काव्यग्रन्थेष्वपि राजनीतेः प्रचुरा सामग्री दृश्यते। मुद्राराक्षसनाटकं, किरातार्जुनीयम्, शिशुपालवधञ्चेति राजनीति–रहस्यपरिपूर्णं विद्यते। तदनु धर्मशास्त्रीय–निबन्धग्रन्थेषु राजनीते र्विभिन्नशाखानां विवेचनं प्राप्यते। चण्डेश्वरठक्कुरस्य (1340ई0) राजनीतिरत्नाकरः, व्यवहाररत्नाकरश्च, वाचस्पतिमिश्रस्य (1440 ई0) व्यवहारचन्तामणिः, विद्यापते र्विभागसारः, मिसरू मिश्रस्य विवादचन्द्रः, अमृतनाथशर्मणः (1800ई0) विवादसारसमुच्चय इत्यादयो ग्रन्था राजनीतिशास्त्रस्य परम्परां संवर्धयन्ति। कथामाध्यमेन नीतिशास्त्रस्य कतिपये ग्रन्था विश्वविश्रुताः पञ्चतन्त्र–हितोपदेश–पुरुषपरीक्षादयो विद्यन्ते।

नीतिशास्त्रस्यैतत्परम्परायामेव अष्टादशखृष्टशताब्दान्ते महामहोपाध्याय भवनाथेन सकलनीतिग्रन्थान् प्रमथ्य तत्सारस्वरूपो

राजनीतिसारनामकोग्रन्थो रचितः। अत्र राजनीतेः सामान्यविषयाणां संक्षिप्तं निरूपणं विविधनीतिग्रन्थेभ्यः संगृहीतमस्ति। तद्विशेषविषयाणां व्यवहार–दायादीनां कृते ग्रन्थान्तरं जिज्ञास्यम्।

राजनीतिसारोऽयं प्रथमवारमेव प्रकाशितो भवति। अस्य एक एव मिथिलाक्षरमयो हस्तलेखः 13 पत्रात्मकः पटनास्थ–विहार राष्ट्रभाषा परिषदि वर्तते। तदाधारेणैवास्य सम्पादनं विहितम्। अत्र नीतिशास्त्रस्य प्राचीनदुर्लभग्रन्थानां नयसार–नयसागर–नयचन्द्र–नयलोचन–नयप्रकाश–नयप्रदीपादीनामुद्धरणानि प्रचुरतया दत्तानि। अन्यान्यपि विंशत्यधिकानि पुस्तकानि नामग्रहणपूर्वकमुद्धृतानि। तेनास्य प्रामाणिकत्वं परिपुष्टं भवति।

अत्र राज्ञः कर्त्तव्याकर्त्तव्य–सहायक–साधन–पदाधिकारि–तत्कर्त्तव्य–प्रजापालन – दण्ड – पुरस्कारादयो विषयाः सपरिचयं बोधिताः। एतेषां विषयाणां ज्ञानं साम्प्रतिकयुगेऽपि तथैव प्रासङ्गिकं वर्तते। नीतिः चारित्रिकं धनं पोषयति, समाजं परस्परं योजयति, राष्ट्रं च परमोच्चादर्शे स्थापयति। अतो हि मया राजनीतिसारः सयत्नं सम्पाद्य प्रकाशमानीयते।

एतत्प्रणेता म0म0 भवनाथो ग्रन्थादौ ग्रन्थान्ते च सूचयति यदयं ग्रन्थो महाराजाधिराज–माधवसिंह बहादुराणां प्रमोदाय प्रणीतः। असौ महाराजो दरभङ्गायां (1775 ई0 तः 1807 ई0 यावत्) मिथिलां प्रशास्ति स्म। म0म0 महेश-ठक्कुरस्य वंशे समुत्पन्नस्यास्य राज्ञो वंशक्रमः इत्त्थं ज्ञायते – एकनाथठक्कुरः–माधवसिंहः –छत्रसिंहः –रुद्रसिंहः–महेश्वर सिंहः–रमेश्वर सिंहः–कामेश्वर सिंहः (अन्तिमो मिथिलेशः, 1962 ई0)। राज्ञो माधवसिंहस्य श्वशुरः पं0 गोकुलनाथ झा अस्य भवनाथस्य सहोदरः। तथा च अयं मैथिलश्रोत्रियाणां 'नरोनय–पूरे' समाख्ये वंशे पराशरगोत्रे समुत्पन्नः। अस्य वंशक्रमः –



भवनाथोपाध्यायस्यावासो मधुबनी–मण्डलान्तःपाति–महरैलग्रामे आसीत्। पश्चात् स गङ्गौलीग्राममागतवान्, यत्र तत्सन्ततयो विराजन्ते। एतत्प्रपौत्रस्य महोपाध्यायस्य लोकनाथस्यैव शिष्यो जगद्विख्यातो म० म० बालकृष्णमिश्रो बभूव। साम्प्रतमेतस्य प्रपौत्रस्य पौत्रेषु डॉ० अमरनाथ झा ल०ना० मिथिला विश्वविद्यालयीय–स्नातकोत्तर मैथिलीविभागाध्यक्षचरः प्राचार्यो वर्तते। एवमेव प्रो० ऋतुनाथ झा तस्यैव विश्वविद्यालयस्याङ्गलविभागीयः प्राचार्यचरो वर्तते।

म०म० भवनाथस्य एक एवायं ग्रन्थो मया उपलब्धो, नान्यग्रन्थस्य सूचना जाता। एतन्नामका अनेके विद्वांस आसन्। कालभेदादि तेषां पार्थक्ये प्रमाणम्। जगद्विश्रुतस्य म०म० शङ्कर मिश्रस्य(1450 ई०)पिता अयाचिप्रसिद्धो भवनाथ मिश्रः,

प्रयोगपल्लवाख्य–व्याकरणग्रन्थप्रणेता म0म0 भवनाथोपाध्यायः (1525 ई0) पलिवारहाटीमूलक इत्यादयो विद्वांसः स्वत एव राजनीतिसारकाराद् भवनाथाद् भिन्नाः।

विलक्षणस्यैतद्ग्रन्थरत्नस्य प्रकाशनेन विद्वांसो मुदिता भविष्यन्ति, स्वयं चाहं प्रथमत एव प्रमुदितो जातः।

अन्ते मूलहस्तलेखप्रतिलिपीकरणादेशदायकं पटनास्थ विहारराष्ट्रभाषापरिषन्निदेशकं प्रति कृतज्ञतां व्याहरन् विरमामि।

दीपग्रामः — *डॉ0 शशिनाथ झा*

स्नातकोत्तर व्याकरण विभागः

1.1. 2000ई0 — का0सिं0द0 संस्कृत विश्वविद्यालयः, दरभङ्गा

म0म0 भवनाथकृतो

राजनीतिसारः

।। ओम् नमो गणेशाय ।।

श्रीमन्माधवसिंहस्य भूमहेन्द्रस्य सन्मुदे।
भवनाथेन सुधिया नीतिसारः प्रतन्यते।।1।।

[नीतिशास्त्रावतरणम्]

नयसारे—

देवराजविभूत्यर्थं गुरुणा नीतिरीहिता ।
बार्हस्पती समाख्याता त्रिवर्गैकप्रसाधिका।।2।।इति।
"उशीनरो महाकाव्यनन्दनो दैत्यपूजितः।।
तेनाधीत्याशु यत्नेन कृतो नयमहोदधिः" ।।3।।

—इति भारते।

नयसारे—

दैतेयराजमन्त्री यो भार्गवः श्रूयते जनैः।
तस्य देवनिरासार्थं शौक्री नीतिः समाहिता ।।4।।इति।

[दुर्गस्थानम्]

राज्ये प्रथमतो दुर्गस्थानमेव चिन्त्यम् । तथा च नयसारे :—

यत्नतस्तु गढ़ं कुर्याद् राजा प्रत्यन्त—पर्वते ।
आश्रयः प्रथमं चिन्त्यस्तेन लोकः सुखं वसेत् ।।5।।इति।

नयसारे–

गिरिदुर्गं महीदुर्गं वनदुर्गं प्रशस्यते।
पानीयदुर्गमपरं गहनं वप्रदुर्गकम् ।।6।। इति।

[सूत्रधारः]

नयसारे–

कथकः सूत्रधारः स्यात् सूत्रं कार्यस्य सूचनम् ।
इति तन्मन्त्रिणा कार्यं (नीतिरेषा गरीयसी) ।।7।।

तत्रैव––– "बालादपि सुभाषितम्" ।।8।। इति।

चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः ।
न शालेः स्तम्बकलिका वप्तु र्गुणमपेक्षते ।।इति।।9।।

–(मुद्राराक्षसनाटके 1–3)।

[प्रकृतिः]

नयसारे–

द्विप्रकाराः प्रकृतयो भवन्ति नृपतेः सदा।
कुलानुरक्ताः तत्त्वज्ञाः सहोत्स्थायि-सुखाश्रयाः।10।।इति।
"नैकाकी निर्णयं कुर्यादिष्टे कृत्यविधौ क्वचित्।
सम्भवन्ति बुधस्यापि दोषो वै विभ्रमादयः" ।।11।।

–इति पुरुषपरीक्षालिखनात्[1]।

त्रिकाण्डशेखरे –

प्रजाः प्रकृतयः प्रोक्ताः सचिवाश्च चिरन्तनाः ।।12।। इति।

[पुरम्]

भारते –

पुरं च ते सुगुप्तं स्याद् दृढ़प्राकार–तोरणम्।
अट्टाट्टालक–सम्बाधं षट्पथं सर्वतोदिशम्।।13।।
तस्य द्वाराणि कार्याणि पर्याप्तानि बृहन्ति च।

---

1. पुरुषपरीक्षा–विद्यापतिः –कथाप्रस्तावः –7.

सर्वतः सुविभक्तानि यन्त्रैरारक्षितानि च ।।14।।

[मंत्री]

अमात्यानुपधातीतान् पितृपैतामहान् शुचीन्।

दान्तान् कर्मसु पुण्यॉंश्च मुख्यान् कर्मसु योजयेत्।।15।।

इति भारतश्रवणाद् मन्त्रिणा राजानमतिक्रम्य मन्त्रयितव्यमिति। तथा च नयसारे :–

द्विजस्तु सचिवः कार्यो क्ष्माभृता भूतिमिच्छता।

वेदवेदार्थतत्त्वज्ञः शास्त्रार्थगतनिश्चयः।।16।।इति।

[बहवः मन्त्रिणः कार्याः]

नयसारे–

एको मन्त्री न कर्त्तव्यः, कार्यकाले समुद्यते।

द्वावप्येतौ न कर्त्तव्यौ, संहतौ तौ हि भक्षकौ।।

विगृहीतौ विनाशाय, त्रयः पञ्च च सप्त वा ।।17।।इति।

मन्त्रिगुणानाह नयसारः –

सन्धि-विग्रहतत्त्वज्ञो दृष्टसर्वप्रतिक्रियः।

एतादृक् सचिवो राज्ञां सर्वकाम-फलप्रदः।।इति।।18।।

स्वामिभक्तियुक्तेन बुद्धिमता सचिवेन राजा किमात्मनो नापादयति?

तदुक्तं नयलोचने –

सर्वज्ञं सचिवं कुर्याद् राजा राज्ये विचक्षणः।

स्वामिभक्तं च धर्मज्ञं पण्डितं राज्यभूतये।।इति ।।19।।

नयसारे –

देशकालविधानज्ञान् भर्तृकार्य-हितैषिणः।

नित्यमर्थेषु सर्वेषु राजा कुर्वीत मन्त्रिणः।।20।।इति।

[नियोगिनः]

सुमन्त्रिभिर्मूर्खा एव नियोगिनः कर्त्तव्या इति। तदुक्तं नयप्रकाशे ––

नियोगिनस्तु कर्त्तव्या मूर्खा एव सुमन्त्रिभिः।
तत्र वा चेतनाः कार्ये कार्यज्ञाः शिष्टभूमिपैः।।21।।इति।

[राजा]

नयसारे ––

कुलशीलगुणोपेतः सत्यधर्मपरायणः।
प्रवीणः सर्वकार्येषु राजाऽध्यक्षो विधीयते।।22।।

[प्रतीहारः]

इङ्गिताकार तत्त्वज्ञो बलवान् प्रियदर्शनः।
अप्रमादी सदा भक्तः प्रतीहारः स उच्यते।।23।।

[दूतः]

पुनस्तत्रैव ––

मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः।
धीरो यथोक्तवादी च एष दूतो विधीयते।।इति।।24।।

[वैद्यः]

वैद्ययोग्यानाह नयसारे ––

आयुर्वेदकृताभ्यासः सर्वेषां प्रियदर्शनः।
आर्यशीलगुणोपेत एष वैद्योऽभिधीयते।।इति।।25।।

नयचन्द्रे ––

चिकित्सा–व्याधितत्त्वज्ञो नाड़िकायाश्च बिन्दकः।
चरकादि–सुशास्त्रज्ञ एष वैद्योऽभिधीयते।।इति।।26।।

[सेनापतिः]

सेनाध्यक्षमाह स एव ––

समस्त–शस्त्र–शास्त्रज्ञो वाहनेषु कृतश्रमः।
शौर्यधैर्यगुणोपेतः सेनाध्यक्षो विधीयते।।27।। इति।।

[सूपकारः]

पिता पितृसमः प्राज्ञः शास्त्रज्ञो मिष्टपाचकः।
शुचिश्च कुशलश्चैव सूपकारः प्रकीर्त्तितः।।28।।

—— इति पाचकलक्षणम्।

[लेखकः]

लेखकगुणानाह स एव ——

सकृदुक्तगृहीतार्थो लघुहस्तो जिताक्षरः।
सर्वशास्त्रसमालोकी एष शासनलेखकः।।29।।इति।।

[पुरोहितः]

पुरोहितगुणानाह स एव ——

वेदवेदार्थतत्त्वज्ञो जपहोमपरायणः।
आशीर्दानपरो दक्ष एष राज्ञः पुरोहितः।।30।।इति।

[अधिकार पात्रता]

अधिकार फलमाह स एव ——

अज्ञे नियुज्यमाने च त्रयो दोषा महीपतेः।
अयशः कार्यनाशश्च नरके पतनं तथा।।31।।इति।
प्राज्ञे नियुज्यमाने च सन्ति राज्ञस्त्रयो गुणाः।
यशः स्वर्गनिवासश्च प्रचुरश्च धनागमः।।32।।
पण्डितेषु गुणाः सर्वे, मूर्खे दोषाश्च केवलाः।
तस्मान्मूर्खसहस्रेषु प्राज्ञ एकः प्रशस्यते।।33।।इति।

[राज्ञो गुणाः]

प्रतापः शुचिता मैत्री त्यागः सत्यं कृतज्ञता।
कुलं शीलं दमश्चेति गुणाः सम्पत्तिहेतवः।।34।।इति

[उपायाः]

अमरसारे --

भेदो दण्डः साम दानमित्युपायचतुष्टयम्।।35।।इति।

नयलोचने तु --

मन्त्रसंगोपनं दानं चरस्य परिपूरणम्।

सैन्यसंवर्धनं राज्ञा ह्युपायाः परिकीर्त्तिताः।।36।।इति।

[त्रिवर्गो नयः]

नयसारे --

उपजापो रिपोः पक्षे मैत्रन्तु प्रत्यनन्तरे।

गतागतं चराणां च त्रिवर्गो नय इष्यते।।37।।इति।

[त्याज्याः]

[1] त्याज्यगुणानाह नयसारे --

अलसं मुखरं स्तब्धं वामं क्रूरं तथा शठम्।

असन्तुष्टमभुक्तं च त्यजेद् भृत्यं नराधिपः।।38।।

त्यजेत् स्वामिनमत्युग्रम् अत्युग्रात् कृपणं त्यजेत्।

कृपणादविशेषज्ञं तस्माच्च कृतिनाशकम्।।39।।इति।

नयचन्द्रे --

वरं ह्यराज्यं, न कुराज-राज्यं

वरं त्वमित्रं, न कुमित्र-मित्रम्।

वरं ह्यदारा, न कुवृत्त-दारा

वरं त्वशिष्यं, न कुशील-शिष्यम्।।40।।

कुराजराज्ये नहि वृत्तिरक्षया

[2]कुमित्र-मित्रे कुत आत्मनिर्वृतिः।

---

1. वस्तुतः 'त्याज्यानाह' इत्येव पाठः समुचितः प्रतीयते।

2. 'कुमित्र उच्चैः' - इति मूलपाठः।

कुतः कुदारे रतिशर्मभोगिता
कुशिष्यमध्यापयतः कुतो यशः।।41।।इति।

[मन्त्रणा]

मन्त्रिणो मन्त्रणायां नीतेः प्राधान्यम्। यतो नयलोचने–

सम्पदां हेतुरुत्कृष्टा सत्कृता फलशालिनी।
या समाचरिता तस्यै नीतयेऽस्तु मतिर्मता।।42।।इति।

नयसारे तु बुद्धेः प्राधान्यम् ––

दुर्धर्षादपि सैन्यान्मतिरेका बलवती जयति।
सन्मन्त्रिणो नयकथा, जगति विशुद्धा मनोहरा भवति।43।इति।

सुप्रयोगकृता नीतिः फलवती भवति। तथा च नयचन्द्रे ––

सुप्रयोगकृता नीतिर्मन्त्रिभिः फलति ध्रुवम्।।इति।।44।।

सम्यक् प्रयुक्ता मन्त्रणा सर्वार्थसाधिका भवति।

तथा च नयसारे ––

शुभे मुहूर्त्ते शुभवासरे वा
शुभप्रदेशे कुरुते सुसिद्धिम्।
द्वाभ्यां त्रिभिर्वा बहुशो विमृष्य
मन्त्रप्रयोगं कुरुते स मन्त्री।।45।।इति।

मन्त्रकरणे निह्नवः कर्त्तव्य इति नयलोचनम्।

नयचन्द्रे ––

चिन्तितं मनसा कार्यं कदाचिन्न प्रकाशयेत्।
मन्त्ररक्षणमूढात्मा कार्यसिद्धिं न चाप्नुयात्।।46।। इति।

नयसारे तु ––

निह्नवं कुरुते मन्त्री यस्तु मन्त्रप्रयोगवित्।
स सर्वफलमाप्नोति कृतनीतिरिति ध्रुवम्।।47।।इति।

मन्त्रिणा मन्त्रणायां स्तब्धेन भवितव्यम्। तथा च नयसारे —

स्तब्धो जिह्मः साभिमानो मनस्वी रोषधृक् पुमान्।।48।।इति।

द्वाभ्यामेव मन्त्रणीयं "षट्कर्णो भिद्यते मन्त्र" इत्यनुसारात्।

नयप्रकाशे —

न मन्त्रयेद् ऊर्ध्वबाहु र्न वा सुप्तो न वा बहिः।

न वाऽस्थाने न वा दुष्टगोष्ठ्यां रात्रौ न चत्वरे।।49।।इति।

[मन्त्रभेदः]

भारते —

मन्त्रभेदे हि ये दोषा भवन्ति पृथिवीक्षिताम्।[1]

न ते शक्याः समाधातुं कथञ्चिदपि मे मतिः।।50।।

दोषाश्च मन्त्रभेदस्य ब्रूयास्त्वं मन्त्रिमण्डले।

अभेदे च गुणान् राजन् पुनः पुनररिन्दम।।51।।इति।।

यदि कृता मन्त्रणा बहुभिर्ज्ञाता भवति, तदा मन्त्रितां वार्तां सदसि स्वयमेव प्रकाशयेत्। तथा च नयसारे —

यदि स्यान्मन्त्रणा ज्ञाता बहुभिर्निभृता भवेत्।[2]

प्रकाशयेत् सदस्येव मन्त्री तामेव कौतुकात्।।इति।।52।।

नयप्रकाशे —

कृतानुकीर्त्तनं मन्त्री सदसि प्रतिपादनात्।

कुर्याद् द्विषद्भयं बुद्धेः सदा स्वस्याः प्रकर्षकम्।।53।।इति।

यदि कृता मन्त्रणा फलवती भवति, तदा मन्त्रिणा तस्याः स्वयमेव प्रकाशनं कर्त्तव्यम्। तथा च नयलोचने —

मन्त्रिणा तु कृता नीति र्यदा फलवती भवेत्।

प्रकाशयेत् तदा मन्त्री मित्रेष्वपि च मन्त्रिषु।।54।।इति।

---

1. पृथिवीशासकानामित्यर्थः।

2. निभृता = गुप्ता मन्त्रणा ज्ञाता भवेदित्यन्वयः।

[कार्यानुसारं दण्ड–पुरस्कारादि]

नयलोचने ––

उत्खातान् प्रतिरोपयन्, कुसुमिताँश्चिन्वन्, लघून् वर्धयन्
उत्तुङ्गान् नमयन् नतान् समुदयन्, विश्लेषयन् संहतान्।
अन्तःकण्टकिनो बहि र्नियमयन्, म्लानान् परं सेचयन्
मालाकार इव प्रयोगनिपुणो राजा चिरं नन्दति।।55।।इति।

अयमाशयः – कार्यवशात् कस्यचित् स्थापनं, कस्यचिद् दण्डः, कस्यापि पुरस्कार इति।

[कपट–विचारः]

मन्त्रिणा कपटप्रधानं निर्णीतमुत्तरं देयं निगूढ़ञ्च। तथा च नयसारे ––

निर्णीतं व्याजगर्भं च देयमुत्तरमानतम्।
सामादि–सन्धौ सर्वत्र मन्त्रिणा सन्धिमिच्छता।।56।।इति।
कपटान्नास्त्यधर्मोऽन्यो मनुः प्रत्याह सर्वदा।।57।।

इतिवचनात् कपटेनाधर्मो जायते। अतः सद्भिः कपटं कर्त्तुं न युज्यत इति।

वराहपुराणे ––

मन्त्रणायां कृतायां तु कपटेन फलं यदि।
दृश्यते मन्त्रिणा तत्र कपटं नैव दोषकृत्।।58।।

इतिवचनात् यत्र कपटेनैव नयसिद्धिस्तत्र न दोषः, मनुवाक्यस्य नयतेरतिविषयत्वादविरोध इति।

[मित्र–परीक्षणम्]

नयसारे ––

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम्।।59।।

[1]बृहन्नाटके ––

शङ्कितव्यो हि सौमित्रे ! दूरस्थोऽपि विभीषणः।

1. महानाटके मधुसूदन मिश्रकृते।

यस्य न स्वजने प्रीतिः कुतस्तस्य परे जने।।60।।इति।

[संघशक्तिः]

नयचन्द्रे —

अभ्रच्छाया सुखप्रीति र्नवशस्यानि योषितः।
किञ्चित्कालोपभोग्यानि यौवनानि धनानि च।।इति।।61।।

संहतिः कार्यसाधिकेति नानानयतन्त्रम्। तदुक्तं

नयचन्द्रे —

संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि।
तुषेणापि परित्यक्तस्तण्डुलो न प्ररोहति।।62।।इति।।

[त्याज्याः]

नयचन्द्रे —

अस्थानं चैव पैशुन्यं मिथ्यावादन्तथैव च।
परेषां कलहं चैव दूरतः परिवर्जयेत्।।63।।इति।

[इष्टसंशये प्रवृत्तिः]

इष्टसंशये भद्रमस्ति। तथाहि (हितोपदेशे) —

न संशयमनारुह्य नरो भद्राणि पश्यति।
संशयं पुनरारुह्य यदि जीवति पश्यति।।64।।इति।

[गुप्तचरः]

राजानश्चारचक्षुष इति नानातन्त्रम्,

नानादेशाचारभाषावेदिभिः कुशलै र्द्विषः।
तत्त्वं निगूढ़–विश्वासात् परिज्ञेयं सुमन्त्रिणा।।65।।

–इति नयलोचनात्।

अन्यच्च —

तपस्विलिङ्गिनो धूर्त्ताः प्रक्लृप्तोभयवेतनाः।
चराश्चरेयुः सततं पिबन्तो जगतां मतम्।। इति।।66।

नयसारे ––

विवस्वानिव तेजोभि र्नभस्वानिव चेष्टितैः ।

राजा चरै र्जगत् कृत्स्नं प्राप्नुयाल्लोकसम्मतम् । ।67 । ।इति ।

नयलोचने––

वणिजो मन्त्रकुशलान् सांवत्सरचिकित्सकान् ।

पाखण्डाँस्तापसाँश्चैव परराष्ट्रे नियोजयेत् । ।68 । ।

विषमस्थानमपि चिरं प्रस्थाप्य तत्त्वं ज्ञातव्यमित्याशयः ।

नयचन्द्रे ––

नग्नो योगी कपाली च तपस्वी सर्पखेटकः ।

नियोजनीयोऽरिमहीपालेषु पटुमन्त्रिभिः । ।69 । ।

क्षपणक–लिङ्गधारी मन्त्रिभि र्विरोधिचरितं ज्ञातुं नियोजनीयः । विदितमर्थं संकेतेनैव निवेदयति चरः । तथा च

नयसारे––

निह्नवेच्च यथाशक्त्या संकेतेनैव बोधयेत् ।

मन्त्रेष्वपि चरो ज्ञात्वा तत्त्वं परमहीभृताम् । ।इति । ।70 । ।

अनृतभाषणं नोचितं चारपुरुषस्य । तच्चोक्तं "पुरुष परीक्षायाम्"[1]––

काणेन चक्षुषा जन्तु र्यथा किञ्चिन्न पश्यति ।

न पश्यति तथा राजा चरेणानृतभाषिणा । ।इति । ।71 । ।

नयलोचने ––

विशिष्याज्ञातसंस्थानो नामानि चरितानि च ।

स्वाधिकारे चरो ज्ञात्वा न नृपेषु निवेदयेत् । ।इति । ।72 । ।

[गुप्तलेखः]

सर्वथा गोपयेन्मन्त्री मन्त्रं सर्वार्थसिद्धये । ।इति । ।73 । ।

पत्रे हि सर्वमव्यक्तं लेख्यं संकेतितं लिखेत् ।

नामशून्यन्तु वर्गेण यथावत्पदमुल्लिखेत् । ।74 । ।

---

1. पुरुषपरीक्षा '–– विद्यापतिः – चौरकथा – श्लोक 9

कुतोऽपि केनापि किमपि कथमप्येवं लिखेदिति नयसागरः।

प्रतिमन्त्रिणि सन्मन्त्री लेखयेल्लेखमुत्तरम्।
मुद्रितं सर्वथा कृत्वा सतो द्वारा जनस्य तु।।75।।

इति व्योषः।

नयसारे --

केनापि कस्यचित् कार्यं कस्मिँश्चिदपि कर्हिचित्।
कस्मैचिद्देयमित्यादि कार्यं गुप्ते लिखेद् बुधः।।76।।इति।

[अनिमित्तं तिरस्कारो न युक्तः]

अनिमित्ततिरस्करणमनुचितं भवति। तदुक्तं नयचन्द्रे--

प्रशंसामात्मनो वापि सुपुण्यस्यानुकीर्त्तनम्।
तैरश्चीन्यं न नीचस्य कुर्याद् विद्याविवेकवित्।।77।।

[परसम्पद् न सोढ़व्या]

नयलोचने --

परस्य लक्ष्मीः सुधिया, न सोढ़व्या कथञ्चन।
क्रमशो वर्धमाना सा, हन्यात् ससचिवं नृपम्।।78।।इति।

वात्स्यायनः --

राजा तुष्यति वसुना, कान्ता दानेन रतिकलाभिज्ञैश्च।।79।।इति।

[राज्ञः समक्षं विरुद्धवचनं न वाच्यम्]

राज्ञः पुरो विरोधिवचनं सर्वथा न गदनीयम्। यथा

नयचन्द्रे --

राज्ञः पुरो विसंवादि वचनं न वदेद् बुधः।
तेन संजायते दोषो दुस्तरः कृतवेदिनाम्।।80।।इति।

[बलिष्ठ–संयमनम्]

ये ये बलवन्तो बहुसाधना राज्ये कुसृष्टिकारकाः, ते संयमनीयाः। तदुक्तं नयलोचने ––

ये स्यु र्वरिष्ठाः सुधियः प्रवीरा
निरुद्ध्य तान् संयमयेत् सुमन्त्री।
राज्ये ऽर्थजातग्रहणं विधाय
पुनः पुरस्कारयुतान् करोति।।81।।इति।

[मुख्यविरोधिनां नाशनमेव]

मुख्यविरोधिहिंसैव, न मन्त्रणा साधीयसी। किन्तु परिषन्मारणीयेति नानानयतन्त्रम्।तथा च पामरा अपि जानन्ति यद् दन्तिनि हते मुख्यशत्रोस्तद्ग्रासश्च न रक्षणीय इति।यथा हितोपदेशे–

निहन्युः सर्वथा शत्रून्, सपुत्रज्ञातिबान्धवान्।
तदपेक्षान् सहायाँश्च, मन्त्रिणो नयकोविदः।।82।।इति।

मूलवैरिणां राज्ञा मन्त्रिणा वा हठादेव निधनं कार्यम्। तदुक्तं नयलोचने––

मूलवैरिणमासाद्य हृदा च सततं तदा।
राज्यकार्यं विचार्याशु कुर्यात्तु निधनं हठात्।।83।।इति।

सकलगुणविशिष्टोऽपि शत्रुः सर्वथा न रक्षणीयः। तदुक्तं नयसारे––

क्रुद्धो दुष्टश्च विक्रान्तो दाता हन्ताथवा विटः।
अकृतज्ञो रिपुर्यः स्यात् तं हन्यादविचारितम्।।84।।इति।

नयप्रकाशे ––

तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम्।
अर्धराज्यहरं भृत्यं यो न हन्यात् स हन्यते।।85।।

इति बार्हस्पती नीतिः। शौक्री नीति र्यथा –– दक्षिणेनैव नयप्रकारेण न नीतिः साधीयंसी। अतो बार्हस्पतीं नीतिं परित्यज्य क्वचित् शौक्रीमप्याश्रयेत्। तदुक्तं नयसारे ––

कुड्यादिषु प्रयुञ्जीत मारणक्षमपूरुषम्।
गृहकारु–महाशिल्पिद्वारा विभ्रामयेद् रिपुम्।।86।।इति।
मारणं तापनं शत्रो र्विषं चैवाग्निदारुणम्।
येषु नीतिप्रकारेषु सा शौक्री नीतिरिष्यते।।87।।इति च।

सर्वथा शत्रो र्मारणं विधेयम्––

वर्तमानं वने दुर्गे हन्याद् रिपुकुलं सुधीः।।88।।

इति नयसागरानुसारात्। अतएव –

ध्रियते यावदेकोऽपि, रिपुस्तावत् कुतः सुखम्।
पुरः क्लिश्नाति सोमं हि, सैंहिकेयोऽसुरद्विषाम्[1]।।89।।

इति माघः। शत्रुवंशप्ररोहान् सर्वथाऽदग्ध्वा क्रोधवह्नि र्न शमनीय इत्याशः।

[मन्त्ररक्षणम्]

मन्त्रः सर्वथा रक्षणीयः। तथा च नयसारे ––

मन्त्रमूलं यतो राज्यमतो मन्त्रं सुरक्षितम्।
कुर्यात् तथैनं न विष्वक् कर्मणामाफलोदयात्।।इति।।90।।

[आकाशप्रश्नः]

रहसि आकाश एव प्रश्नं कुर्यात्। यथा नयसारे ––

युक्त्या तत्प्रतियुक्त्या वा तारतम्येन मन्त्रवित्।
रहो वितर्कयेत् कार्यमद्वितीयेन सर्वदा।।91।।

इत्याकाशप्रश्नः।

[तद्दर्शने वर्ज्यावर्ज्यचराः]

एतद्दर्शने वर्जनीयाश्चराः ––

---

1. शिशुपालवधम् — 2–35.

नीचरक्तः सुरासक्तः चाण्डालः सर्पखेटकः।

नास्तिको दर्शनेऽप्येते वर्जनीयाः सदीश्वरैः।।92।।इति।

किन्तु एतादृशाश्चरा अवर्जनीयाः ––

परिव्राड् धर्मशास्त्रज्ञः सुवृत्तिमहितः कविः।

चरश्च वन्दी शुभगा दर्शनीयाः सदीश्वरैः।।93।।इति।

[अनाहूत–गमन निषेधः]

अनाहूतो न गच्छेद्, अपृष्टो न बहु भाषेत। तथा च हितोपदेशे––

अनाहूतो विशेद् यस्तु, अपृष्टो बहु भाषते।

आत्मानं मन्यते प्रीतं, भूपालस्य स दुर्मतिः।।94।।इति।

[राज्ञो विषये मन्त्रिणो वर्तनम्]

यत्र कुत्रापि दूतो दौत्यं प्रकाशयति, तत्र कस्यापि सन्निधानं न विधेयं "षट्कर्णो भिद्यते मन्त्र" इत्यनुसारात्। बुद्ध्यैव क्रियया सह सामादिभिरुपायैर्मन्त्री नृपमवेक्षेत इति। तथा च नयलोचने ––

बुद्ध्यैव सचिवोऽवेक्षां क्रियया सह भूपतेः।

आप्तः समाचरेच्छश्वत् नरं सामादिभि र्मतः।।95।।इति।

सर्वदा अवधानपरेण विनीतेन च मन्त्रिणा भवितव्यम्––

अवधानपरेणैव मनसा वचसा सदा।।96।।

इति नयलोचनानुसारात्।

नीतिकरणेन इन्द्रोऽपि तुष्टो भवतीति परिश्रमो न गण्येत। तथा च नयलोचने ––

भवितव्यं सदा मन्त्रिवर्येण नयशालिना।

रिपुनिग्रहचित्तेन शतमन्योः प्रतुष्टये।।97।।इति।

स्वामिभक्तशालिना जितेन्द्रियेण सेवकेन नयसिद्धिः।

तदुक्तं नयलोचने ––

अन्तःपुरचरो राज्ञो विप्रो गुणगणान्वितः।

मन्त्रवित् कार्यकुशलः स्वामिभक्तो जितेन्द्रियः।।98।।इति।

मन्त्रिणा राज्ञोऽभिमतं कर्त्तव्यम्। तथा न नयसारे ––

मुख्यै र्महीभृतः सिद्धै र्मन्त्रिभिः समलङ्कृतैः।

भवितव्यं सदा राज्ञो भूपते र्यशसे मुदा।।99।।इति।

मन्त्रिभिः कदापि स्वामिगुणा न विस्मरणीया, गदनीयाश्चैव। तथा च नयसारे ––

स्मरणीयाः स्वामिगुणा, गदनीयाः सुनयशालिभिः सततम्।

कर्त्तव्यं नयसिद्धं, कार्यं हृदयं शुभोदर्कम्।।100।।इति।

सप्रतिज्ञेन राज्ञा मन्त्रिणा कार्यं साधनीयम्। तथा च नयसारे ––

कर्त्तव्या सदसि रुषा, समाप्यरावन्यमन्त्रिभिः पुरतः।

नयशालिभिः प्रतिज्ञा, अरिभूमिप्राप्तये काचित्।।101।।इति।

यद्यमात्यः सुसङ्गतः स्यात् तदा राजा न [1]किञ्चित् परिश्रमं लभते। तदुक्तं नयलोचने ––

अमात्यस्तादृशः प्रोक्तो राजा नैति यतः श्रमम्।

सुलभा सर्वसम्पत् स्यात् तस्य राज्ञश्च मन्त्रिणः।।102।।इति।

यावदन्यत्रापि प्रौढो रिपुस्तिष्ठति, सकलं तावद् राज्यसुखं राजा न लभते। स्वतो मन्त्रिणा राज्ञा च दूरस्थस्यापि शत्रो र्विध्वंसने सर्वदा सर्वप्रकारेण यत्नो विधेयः। यतः ––

भूभुजा मन्त्रिणा नीतितत्त्वज्ञेन दवीयसः।

रिपो र्बलवतो नाशं चिन्तनीयं शुभार्थिना।।103।।

इति नयसारः। केवलं मन्त्रिणा युक्तिप्रतियुक्तिभिरेव विपक्षनिर्जयो न भवति, किन्तु सैन्यपराक्रमेणापि। तथा च नयलोचने ––

प्राकारान् परितस्तुष्टा धानुष्काः स्थानमण्डलम्।

कुर्युरालीढ़कुशला गूढ़ेश्वरमहीपतेः।।104।।इति।

---

1. 'कञ्चिदिति' पाठो युक्तः, अथवा किञ्चिदित्यल्पार्थकमव्ययम्।

तत्रैव --

द्वारेषु द्विरदा धेया मदोत्कटमुखा रुषा।

प्रतिभूमिपसेनायां मत्तमातङ्गशान्तये।।105।।इति।

अरिदुर्गमदुर्गेषु अभङ्गुरहृदः स्थिरान्।

सन्निधौ विक्रममयान् स्थापयेन्मुख्यमन्त्रिणः।।106।।

इति नयसारः। पुनश्च तत्रैव --

प्रतिराजपुरं रुन्ध्यात् समन्तान्मन्त्रिभिर्नृपः।

रथाश्वपत्तिधानुष्कगजैश्चाप्तैश्च सेवकैः।।107।।इति।

पुनश्च --

यत्रातिरिक्तरोषेण मन्त्री मन्त्रणया गुरुः।

सुरङ्ग–भित्ति–पक्षादिद्वारा शाम्येदरिं नृपम्।।108।।इति।

[विषकन्याप्रयोगः]

मन्त्रिणा प्रबलरिपुनिराकरणाय विषकन्या ध्रियत – इतिनानानयग्रन्थाभिचारिकप्रकरणे कथितमस्ति। तथा च नयसारे–

लावण्यभूषणाक्रान्तां पोषितां क्रमशो विषैः।

युवतीं योजयेत् कामि–रिपुभूपालशान्तये।।109।।इति।

[पुन र्मन्त्रः]

प्रतिहतेऽपि नये अवश्यं मन्त्री पुनर्मन्त्रं रचयितुमर्हतीति। तथा च नयसारे --

विफलेऽपि मन्त्रजाते, नये प्रयुक्ते च दैवविपरीतात्।

नो मन्त्रिभिः कथञ्चिद्, उदासितव्यं समुद्योगात्।।110।।

हितोपदेशे --

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान्।

नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्।।इति।।111।।

मन्त्रिभिः परामृष्य कार्य कर्त्तव्यम् --

निरूपणं परामर्शोऽभिषङ्गो ज्ञानमेव च।।112।।

—— इति व्योषः।

[विधि—निषेधाः]

प्रथमतो विधिनिषेधौ राज्ञा कर्त्तव्यौ। तथा च नयसारे ——

मन्त्रिणां पुरतो राजा कार्यमादिशति स्वयम्।
परस्परादेशवशादन्योऽपि कुरुते जनः।।113।।इति।

[अतिविश्वासः त्याज्यः]

स्वकीयेष्वपि वर्गेष्वतिविश्वासो न कार्यः ——

स्वकीयेष्वपि वर्गेषु विश्वसन्ति न मन्त्रिणः।
कस्य कीदृग्गुणस्तत्त्वं न जानन्ति बुधा अपि।।114।।

—— इति नयलोचनम्।

अविश्वस्ते न विश्वसेत्। तथा च हितोपदेशे ——

न विश्वसेदविश्वस्ते, विश्वस्ते नातिविश्वसेत्।
विश्वासाद् भयमुत्पन्नं मूलादपि निकृन्तति।।115।।इति।

[अतितीक्ष्णतातिमृदुता त्याज्या]

राज्ञा नातितीक्ष्णेन भवितव्यं, नातिमृदुना च मन्त्रिणापि ——

न तीक्ष्णतानुसर्त्तव्या मन्त्रिभिश्च सुराजभिः।
तैक्ष्ण्याद् भवति लोकानां विरक्तिः सार्वकालिकी।।116।।

—— इति नयसारः।

नात्यन्तं मृदुना भाव्यं पुरुषेण कदाचन।
तमसा ग्रस्यते चन्द्रो मार्दवादचिरं मुहुः।।117।।इति।

अन्यच्च ——

तुल्येऽपराधे स्वर्भानु र्भानुमन्तं चिरेण यत्।
हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम्।[1]।।118।।

—— इति माघः।

1. शिशुपालवधम् – 2-49.

[मूर्खो न नियोक्तव्यः]

मूर्खोपदेशः कार्याय न भवति। तच्चोक्तं हितोपदेशे ––

उपदेशो हि मूर्खाणां प्रकोपाय, न शान्तये।
पयःपानं भुजङ्गानां केवलं विषवर्धनम्।।119।।इति।

मन्त्रिणा अतिमूर्खः कार्ये कुत्रापि न योजनीयः ––

अतिमूर्खस्तु कार्येषु न योज्यो मन्त्रिणा क्वचित्।
नये न विनये चैव न मूर्खः कुशलो भवेत्।।120।।

–– इति नयसारः।

नीतिस्तु चतुरा मूर्खमत्यन्तं त्यजति स्फुटम्।
चतुरा वरणायैव तस्मान्मूर्खं परित्यजेत्।।121।।

–– इति नयलोचनम्।

[अतिक्रोधी त्याज्यः]

अत्यन्तक्रोधनस्याशीलस्य शूरस्यापि परित्यागः कार्यः ––

अत्यन्तं नापि शूरस्य संग्रहं कुरुते नृपः।
कदाचिद् रोषतः शूरः कुरुते विक्रियां पराम्।।122।।

–– इति नयसारः।

[स्थिरचित्तता]

व्याकुलचित्तेन किमपि कार्यं न कार्यम् ––

अकाण्डाद् व्याकुलतया कार्यं कार्यं न भूभृता।
तयैवोद्विजते लोकस्तस्मात् कुर्याच्छनैः शनैः।।123।।

–– इति नयसारानुसारात्।

[कदाचित् कौतुकग्रहोऽपि]

राज्ञा मन्त्रिणा च कदाचित् कौतुकासक्तचित्तेन भवितव्यम् ––

कौतुकासक्तमनसा भवितव्यं प्रयत्नतः।
मन्त्रिणा च नरेन्द्रेण कदाचित् सुखमिच्छता।।124।।

–– इति नयसारानुसारात्।

[राजाज्ञाभङ्गो न कार्यः]

राज्ञो मन्त्रिणश्चाज्ञा सेवकै र्नातिक्रमणीया। यतः ––

आज्ञाभङ्गो नरेन्द्राणां, द्विजानां मानखण्डनम्।
पृथक् शय्या वरस्त्रीणामशस्त्रवध उच्यते।।125।।

[शिष्टविरोधः परिहरणीयः]

राज्ञा मन्त्रिणा च शिष्टविरोधः सर्वथा परिहरणीयः ––

अनुचितकर्मारम्भः, शिष्टविरोधो बलीयसा स्पर्धा।
प्रमदाजनविश्वासो, मृत्यो र्द्वाराणि चत्वारि।।126।।

–– इति नयसारः।

[निष्प्रयोजनकर्मनिषेधः]

निष्प्रयोजनं किमपि न कर्त्तव्यम्। तदुक्तं नयतन्त्रे ––

न स्थातव्यं, न गन्तव्यं, न वक्तव्यं कदाचन।
सर्वथा हि त्वया तात ! त्रिविधं निष्प्रयोजनम्।।127।।इति।

[राज्ञः कटुभाषणादिनिषेधः]

राज्ञश्च कटुभाषित्वमनर्थाय प्रकल्पते।
ततो विवर्तयेद् वक्त्रभ्रुवौ राजानुनेष्यति।।128।।इति।

नयसारे ––

नाकस्माद्धसितव्यं वा तोषितव्यं मनीषिणा।।129।।इति।

तर्हि प्रतापक्षतिः स्यादतो दृष्टिरेव ज्वलनकणमुग् दातव्येति। तथा च नयलोचने ––

दृष्टिरेव तथा क्रूरा देया जनपदेषु वा।
आश्वासेनैव वा कार्यं कार्यं कार्यविदा सदा।।130।।इति।

[मन्त्रविदोऽवसरवादिता]

वचरस्त्वसरं प्राप्य परकीयमहीभुजि।
भेदाय यतते राजमन्त्रिणोः कार्यसिद्धये।।131।।
निगूढार्थां शुभां वाचं दुरुद्भेदसमन्विताम्।
योजयेन्मन्त्रविद् भूपे मन्त्रिणः कार्यसिद्धये।।132।।

—— इति नयलोचने।

[बलवति रिपौ सेवादिनानुप्रवेशः]

बलवति रिपौ राज्ञा मन्त्रिणा वा सेवादिनाऽनुप्रवेशः कार्यः। तदुक्तं नयचन्द्रे ——

बलीयसि रिपौ मन्त्री राजा वा सेवयाचिरम्।
अनुप्रवेशं कुरुते कौशलेन बलेन वा ।।133।।इति।

[नृपाद् भेतव्यम्]

सर्वथा नृपाद् भेतव्यम्। यतः ——

भेतव्यं हि सदा बुद्ध्या क्रियया हृदयेन च।
भुजङ्गादिव भूमीशाद् बुद्धिमन्नीतिपारगैः।।134।।

—— इति नयसारः ।

स्वतन्त्रो नृपतिः कार्यं कुरुते स्वेच्छया यदा।
तदा रोषात् स्वविषये भेतव्यं नृपते र्जनैः।।135।।

—— इति नयलोचनम्।

शिष्टादपि भेतव्यम् ——

कौचर्यं कुरुते मन्त्री यदा दारा महीपतेः।
तदा कोऽपि न रक्षायै कस्यापि प्रभवत्यतः।।136।।

—— इति नयलोचनम्।

पुनश्च,

कुटिलो [1]व्याचरन्मन्त्री कौटिल्येषु विशारदः।
पोषितव्याघ्रवद् भीमः तस्मात् कुर्यात्ततो भयम्।137।।

—— इति नयलोचनम्।

1. 'व्याघ्रवन्मन्त्री' – इति मूलपाठः।

शिष्ट एव परं न सेव्य इत्याह --

एकान्ते मुख्यभावेन आसत्त्या घनसेवया।
सेवते नृपतिं यस्मात् तस्मात्तस्मात् क्रियाद् भयम् ।138।।

-- इति नयसारः।

[राजतोऽधिक-वेषादिकं नोचितम्]

मन्त्रिणा राजतोऽधिकवेषादिकं न कर्त्तव्यम्। यतः --

सर्वथा राजतो मन्त्री हीनवेषादि कल्पयेत्।
न जायतेऽभ्यसूया च राज्ञश्चेतसि कर्हिचित्।।139।।

--इति नयप्रकाशः।

[सचिवसौहार्दम्]

सचिवैस्तथा सौहार्दमाचरणीयं, येन राजा सप्ताङ्गं राज्यं सचिवेषु समर्पयति --

हृदयेन समं शिष्टै र्व्यवहार्यं महीभुजि।
तेन तन्निजभोगाय सप्ताङ्गं[1] राज्यमिष्यते।।140।।

-- इति नयसारः।

मन्त्रिणा नृपः सदा प्रसादाभिमुखः कर्त्तव्यः --

स्तुतिभिः शश्वदाशीर्भिः संसदि प्रीतमानसः।
सर्वदा तोषयेन्मन्त्री राजानं राजसम्पदि।।141।।

-- इति नयसारानुसारात्।

भारते --

कोषस्य संचये यत्नं कुर्वीथा न्यायतः सदा।
विविधस्य महाराज! विपरीतं विवर्जयेत् ।।142।। इति।

---

1. 'स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च' सप्तप्रकृतिरित्यमरः।

मन्त्रिणा अर्थसन्देहे नृपः प्रष्टव्यः ––

सम्प्रष्टव्योऽर्थसन्देहे मन्त्रिणा कार्यतो नृपः।
तेन संजायते कार्यसुश्लेषः सर्वथा चिरम्।।143।।

–– इति नयलोचनानुसारात्।

मन्त्रिणा स्वल्पाक्षरैः स्वामिषूत्तरं देयम्। यथा नयसारः ––

पत्यौ प्रसन्ने सुधिया वाचं यच्छति सद्गुणाम्।
स्वल्पाक्षरोत्तरं देयं तेन तुष्टो भवत्ययम्।।144।।इति।

युष्मत्प्रसादादिति।

[कृतककलहः]

परशिष्टहृदयपरिज्ञानार्थं स्वभूमिपतिना सह मन्त्री कृतककलहं करोतीति नानानयतन्त्रम्। तथा च नयसारे ––

परशिष्टात्मनो रोष–तोषौ ज्ञातुं महीभुजा।
समं मन्त्री तु कलहं कृत्वा जानाति तौ हठात्।।145।।इति।

नयलोचनकारोऽपि ––

कृतकं कलहं कुर्यादज्ञातान् ज्ञातुमाश्रितान्।
भूपेन सह सम्मन्त्र्य स्वयं मन्त्री विचक्षणः।।146।।इति।

[मन्त्रिपुरस्कारः]

राज्ञा मन्त्रिपुरस्कारः कर्त्तव्यः ––

मन्त्रिणः सर्वदा राज्ञा समक्षं सत्पुरस्कृतिः।
परं विधेया तेन स्यादाप्तत्वं मन्त्रिणश्चिरम्।।147।।

–– इति नयसारानुसारात्।

[निष्प्रयोजनमाह्वानत्यागः]

राज्ञा निष्प्रयोजनं सचिवाह्वानं सर्वथा न कर्त्तव्यम् ––

निष्प्रयोजनमाह्वानं न कर्त्तव्यं कदाचन।
मन्त्रिणः सततं राज्ञा कार्ये व्यासङ्गवस्तुनः।।148।।

–– इति नयसारानुसारात्।

(राजाज्ञाया गरीयस्त्वम्)

राज्ञामाज्ञा गरीयसीति नानातन्त्रसिद्धम्। तदुक्तं नयप्रकाशे ––

आज्ञाभङ्गं रणाद् भङ्गं रणादपसृतिस्तथा।

परस्त्रीग्रहणं पुंसां यत्नाद् राजा परित्यजेत्।।149।।इति।

(निवेदनश्रवणम्)

मन्त्री सर्वां वार्तामाकर्ण्य निभृतात्मना विमर्षयेत्। तदुक्तं नयसारे ––

मन्त्री तु गोचरं श्रुत्वा स्वचित्तेनावधारयेत्।

आलोच्य बहुधा बुद्ध्या कल्पयेदुत्तरं वरम्।।150।।इति।

सावशेषं नृपो दद्यादुत्तरं तेन जायते।

उत्कृष्टं फलदं नूनं वाक्यपूरणकारणात्।।151।।

––इति नयसारः।

पुनस्तु नयलोचने ––

राजा तु गोचरं श्रुत्वा चित्तेनैवावधारयेत्।

अथोत्तरं तथा देयं विमृष्टं तु यथा भवेत्।।152।।इति।

(दान–भोगौ)

राज्ञा स्वेच्छया दानभोगाभ्यां धनाद्युपभोगः कर्त्तव्यः। तदुक्तं नयलोचने––

स्वेच्छया दानभोगाभ्यां राजा राज्ये विराजते।

अन्यथा राजसम्पत्ति र्वृथैव स्याच्च सर्वथा।।153।।इति।

(मन्त्रिणोऽत्युग्रस्वातन्त्र्यनिषेधः)

मन्त्री अत्युग्रं स्वातन्त्र्यं न कुर्यात्। तदुक्तं नयलोचने ––

मन्त्री स्वातन्त्र्यमत्युग्रं न कुर्याद्धरणीपतेः।

तथा सति क्रमात् तस्मिन्नपि रक्तायते हि सः।।154।।

स्वतन्त्र एव राजा स्यात् नास्वतन्त्रः कदाचन।

विधात्रैव हि सृष्टोऽयं लोकपालाङ्गतो यतः।।155।।

–– इति नयसारात्।

[राज्यानर्हाः]

राज्यानर्ह–राजानमाह नयसारः ––

कामुकं मृगयासक्तं मधुपानरतं जड़म्।
चलचित्तं गजाध्यक्षं न कुर्वीत सदा नृपम्।।156।।इति।

राजकार्यानर्हमाह नयचन्द्रे ––

निःस्वमक्षरतं क्रूरमनास्थापरमेव च।
विरक्तञ्च भुजङ्गेषु नृपोऽध्यक्षन्न चाचरेत्।।157।।इति।
जीव्येनैव विरक्ता ये, ये विरक्ताश्च कर्मणि।
तान्नृपो निजकार्येषु योजयेन्न कथञ्चन।।158।।

–– इति नयसारः।

नयलोचने ––

अन्याप्तेषु विरक्तेषु पुरुषेषु न चार्पयेत्।
हस्त्यश्वरथपादातान् नाशयन्ति समर्पितान्।।159।।इति।

[निदेशः]

निदेशमाह नयसारः ––

मन्त्रिणः पुरतः शश्वन्मन्त्रिणं शंसयेन्नृपः।
तेन मन्त्री प्रकुरुते शस्तं कार्यं महीभृतः।।160।।इति।
परभूमिपदुर्गेषु चिरं स्थित्वा सुमन्त्रिणा।
तेन राज्यं लभेद् राजा परस्य सुखसाधकम्।।161।।

–– इति नयसारात्।

[रिपौ कृतककोप प्रकाशनम्]

मन्त्रिणा रिपुविषये कृतककोपं विधाय सदसि प्रतिज्ञा कर्त्तव्या। तेन परम्परयापि तां वार्तामाकर्ण्य रिपवः सन्त्रसन्ति। तथा च नयचन्द्रे ––

कोपात् प्रतिज्ञां विषमां करोति, रिपुसंकुलम्।
त्रस्तं, मन्त्री सभायां वा चरद्वारा विबोधयेत्।।162।।इति।

[आज्ञामादाय अन्तःपुरप्रवेशः]

आज्ञातः प्रविशेदन्तःपुरं राज्ञां सुसेवकः।
दूतः स्निग्धोऽपि तच्चेतः प्रविज्ञायानिशं प्रभोः।।163।।

—— इति नयसारः।

[दूतदर्शने विलम्बो न कार्यः]

चरदूतदर्शने मन्त्रिणा राज्ञा वा विलम्बो न कर्त्तव्यः ——

विसन्धाने यदा दूतश्चरो वा समुपागतः।
दर्शनं मन्त्रिणा देयमविलम्बितमेतयोः।।164।।

——इति नयप्रदीपः।

समागतस्य दूतस्य चरस्य वा प्रथमतो मन्त्रिणा गौरवं कर्त्तव्यम्, तेन यथादौत्यं प्रकटयति, यदाह नयचन्द्रे——

आदौ गौरवमाधेयं महद् दूतेषु मन्त्रिभिः।
तेन प्रकटयत्यर्थं गौरवाह्लादिमानसः।।165।।इति।

तेनापि दूतेन सचिववृत्तान्तो न वक्तव्यः। तदुक्तं नयचन्द्रे ——

ताड़ितेनापि दूतेन न प्रकाश्यं चरेण वा।
निगूढ़ं सर्वथा व्यक्तं स्वामिभक्ते र्यदुत्तरम्।।166।।इति।

[महावैरम्]

महावैरमाह नयचन्द्रे ——

पितृवैरं धरावैरं योषिद्वैरं त्रयं महत्।
महावैरमिति ख्यातं प्राणान्तिककरं खलु।।167।।इति।
तत्रापि ये पुमांसः स्यु र्बलवन्तोऽभिमानिनः।
तैरेवं साधयित्वा तु कुर्वन्तु पितृतर्पणम्।।168।।

—— इति नयसारानुसारात्।

[राजाज्ञायां विलम्बो न कार्यः]

सेवकेन ईश्वराज्ञायां क्षणमपि सर्वथा शैथिल्यं न कर्त्तव्यम् ––

क्षणैकमपि नाज्ञासु शिथिलः सेवको भवेत्।
शैथिल्येनाशु सुमहान् कोपः स्याद् राजमन्त्रिणोः।।169।।

–– इति नयचन्द्रः।

नेतव्या हि सदाज्ञा तैः सेवकैस्तत्क्षणात् क्रियाम्।
अन्यथा किन्न नष्टं स्यात् पुत्रदारधनं हठात्।।170।।

–– इति नयचन्द्रः।

[नृपगुणाः]

वार्तां नानाविधां श्रुत्वा चराद् वा शिष्टतोऽपि वा।
नृपः प्रकाशयेत् प्रेम्णि सन्मन्त्रिणि सुसेवके।।171।।

–– इति नयसारः।

सेवने नृपगुणानाह नयसारः ––

विज्ञान–गुणसम्पन्नं विजिह्मं चैव धार्मिकम्।
सेवयेदीश्वरं शक्तं सन्मन्त्रिपरिवेष्टितम्।।172।।इति।
सुधर्मपुरुषद्वारा सेवके सुखहेतवः।
संजायन्ते प्रियास्तस्य धनधान्यादिसम्पदः।।173।।

–– इति नयसारः।

हितोपदेशेऽपि ––

सेवितव्यो महान् वृक्षः फलच्छायासमन्वितः।
यदि दैवात् फलं नास्ति च्छाया केन निवार्यते।।174।।
हीनसेवा न कर्त्तव्या कर्त्तव्यो महदाश्रयः।
पयोऽपि शैण्डिनीहस्ते मद्यमित्यभिधीयते।।175।।इति।

[अनुग्रहादि]

अवसरे अनुग्रहाचरणं पैशुन्यं वा कृतं फलवद् भवतीति। यतः ––

प्रस्तावेऽनुग्रहो राज्ञः कस्मिँश्चिदपि राजनि।
पिशुनस्य फलं धत्ते पैशुन्यं नान्यथा भवेत्।।176।।इति।

[दुर्जनोक्ति–प्रकाशननिषेधः]

दुर्जनोक्तं सदसि भयावहम् ––

दुर्जनैरुच्यमानानि सम्मितानि प्रियाण्यपि।
अकालकुसुमानीव भयञ्च जनयन्ति ते[1]।।177।।

–– इति भारतात्।

[प्रजारक्षणम्]

राज्ञा प्रजारक्षणपरेण भवितव्यम्। यतः ––

यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा।
अकर्णधारा जलधौ विप्लवेतेह नौरिव।।178।।

–– इति नयचन्द्रः।

प्रजां संरक्षति नृपः सा वर्धयति पार्थिवम्।
वर्धनाद् रक्षणं श्रेयः तदभावे तदप्यसत्।।179।।

–– इति नयचन्द्रः।

नन्दनीयाः प्रजाः सर्वाः सर्वदा सन्नराधिपैः।
तेन तन्मनसा हृष्टाः प्रयच्छन्ति वसु क्रमात्।।180।।

–– इति नयसारात्।

[राज्ञो विहारो नोपहसनीयः]

ईश्वरस्य विहारं नोपहसेत्। तदुक्तं नयसारे ––

न भञ्जयेदीश्वरस्य रभसं विज्ञसेवकः।
मन्त्री च सविरुद्धश्चेत् क्रमादाप्तः समन्चयेत्।।181।।इति।

[अपराधानुसन्धाने मन्त्री]

अपराधानुसन्धानं कुर्याद् राजा सुमन्त्रिणि।

---

1. ते = तव।

ततोऽपराधदण्डस्य निर्णयं कुरुते परः ।।182।।

—— इति नयलोचने।

मन्त्रिदोषे न दृष्टिं वा प्रदद्याद् भूपतिः स्वयम्।

कुरुते विक्रियां मन्त्री किं तदा कुरुते नृपः।।183।।

—— इति नयसारात्।

[राजानं कोपयेन्नैव]

राजानं न कोपयेत् तदुक्तं नयचन्द्रे ——

न कोपयेद्धरानाथं ज्ञानवान् सर्वथा नरः।

कुप्ते तस्मिन् विनाशः स्यात् पुत्रदारधनस्य च ।।184।।इति।

अनिमित्तं कमपि न कोपयेत् ——

अनिमित्तं सुधीः कञ्चित्, सुधियं न प्रकोपयेत्।

अज्ञस्य चास्थिरः कोपः, प्रगाढ़ः सुधियो भवेत्।।185।।

—— इति नयचन्द्रात्।

[राज्ञा मन्त्रिनिवेदनं नोपेक्षणीयम्]

न लङ्घयेद् गौरवतो गोचरं मन्त्रिणो नृपः।

दृष्टे तस्मिन्नृपस्य स्यात्ततः श्रीः सर्वतोमुखी।।186।।

—— इति नयसारात्।

[मन्त्रिणा सन्दिग्धं न वक्तव्यम्]

सन्दिग्धं वचनं मन्त्री न वदेत् ——

आत्यन्तिकात् कारणाद् वा भेदः स्यान्मन्त्रिभूपयोः।

सर्वथा वारणीयः सोऽविनाशायोभयोरपि।।187।।

—— इति नयचन्द्रात्।

[युक्त्या कार्यावधारणम्]

युक्त्या कार्यावधारणं कर्त्तव्यम् ——

युक्त्या संकेतयेन्मन्त्री कार्याकार्ये विचारतः।

तया निर्धार्य कार्यन्तु निर्णेतुं स्यात् प्रभुः स्वयम्।।188।।

—— इति नयचन्द्रानुसारात्।

[प्रतिज्ञापूर्त्तिपर्यन्तं सुखदुःखाविगणनम्]

मन्त्री राजा वा प्रतिज्ञापूर्त्तिपर्यन्तमात्मसुखदुःखं न गणयेत्। तदुक्तं नयसारे --

प्रतिज्ञापूर्त्तिपर्यन्तं शक्तः स्वीये तनौ सुखम्।
दुःखं वोपस्थितं मन्त्री राजा वा गणयेन्नहि।।189।।इति।

[विजय–प्रयाणम्]

विशुद्धदेशे कालेन समृद्धेन बलेन च।
नोपेक्षयेद् रिपुध्वंसं मन्त्री राजा कथञ्चन।।190।।

-- इति नयचन्द्रात्।

विजये प्रयाणकालमाह --

बलावसादं शत्रोर्वा व्यसनं भेदमेव वा।
परिज्ञाय नृपः कुर्यात् प्रयाणं नान्यथा पुनः।।191।।

-- इति नयचन्द्रे।

[मन्त्रिणो गौरवम्]

यदि राजा महत्प्रेम धत्तेऽन्येषु तथापि तत्।
मन्त्र्यायत्ति र्भवत्येव सर्वथा नृपतेः सदा।।192।।

-- इति नयसारे।

यदि राजा स्वयं स्नेहं कुरुते नागरीयके।
तथापि सचिवायत्तो ध्रुवं पतति नान्यथा।।193।।

-- इति नयसारे।

[राजमन्त्रिणो वैरम्]

भूपमन्त्रिणो वैरमनर्थाय भवति --

हृदये यदि वैषम्यं स्थिरं स्याद् भूपमन्त्रिणोः।
शत्रुकर्मजये नूनं किमन्यत् कारणं भवेत्।।194।।

-- इति नयसारे।

[राजकार्ये त्रिविधा सिद्धिः]

नयशास्त्रे कार्ये सिद्धिस्त्रिविधा –– राजायत्तिः, सचिवायत्तिः, उभयायत्ति र्वा। तत्र ––

शिष्टायत्ति नृपायत्तिरुभयायत्तिरेव च।
विनश्यत्युभयायत्तौ तस्मात्तां परिवर्जयेत्।।195।।इति।

राजायत्ताः प्रजाः सर्वाः, समुद्वेगप्रतापतः।
लभन्ते परमं दुःखं, न साध्वी सा कथञ्चन।।196।।

–– इति नयचन्द्रे।

शिष्टायत्तौ क्रमाच्छिष्टः स्वकार्यं परमश्नुते।
लभन्ते परमं दुःखं प्रजाः परमदानतः।।197।।इति।

उभयायत्तौ विनश्येत राज्ञां राज्यं धनं जनाः।
तस्मात् स्वतन्त्रो नृपतिः वरं श्रेयः प्रजाधनम्।।198।।

–– इति सारावलीकारः।

[मन्त्रिणा आत्मप्रशंसा नोचिता]

स्वोत्कर्षं कुरुते मन्त्री न कदाचिदपि द्विषा।
अविकत्त्थन एवात्र शोभते बुद्धिवैभवः।।199।।

–– इति नयसारे।

[सचिवानादरो नोचितः]

शत्रुविजये सचिवानादरो न कर्त्तव्यः। तदुक्तं नयचन्द्रे ––

बलवच्छत्रुनाशेषु तद्राज्यग्रहणेषु च।
आदर्त्तव्यं वचो भूपैः सेनाध्यक्ष–सुमन्त्रिणोः।।200।।इति।

[आलस्यत्यागः],

कर्त्तव्ये कार्येऽनालस्येन भवितव्यम्। यतः ––

यत् किञ्चित् क्रियते कार्यं मन्त्रिभिस्त्वरया च तत्।।201।।

–– इति नयसारे।

परामर्शेन सिद्धे कर्त्तव्ये कालातिपातो न कर्त्तव्यः। तदुक्तं नयचन्द्रे ––

कालातिपातो नो कार्यः कर्त्तव्यस्य च कर्मणः।

क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्।।202।।इति।

आदानस्य प्रदानस्य कर्त्तव्यस्य च कर्मणः।

क्षिप्रमक्रियमाणस्य कालः पिबति सम्पदः।।203।।

–– इति नयलोचनानुसाराच्च।

(निरपेक्षो न कर्त्तव्यः)

सेवकेनापि स्वामी निरपेक्षो न कर्त्तव्यः ––

निरपेक्षो न कर्त्तव्यः स्वामी भृत्यैः कदाचन।

स्वामिनापि न कर्त्तव्या भृत्याः स्वस्थाः कदाचन।।204।।

–– इति हितोपदेशात्।

(देशकालपरामर्शः)

कृतीनां पुरुषाणां कार्यवैगुण्यन्तु देशकालविसंवादित्वेन। तदाह नयसारे––

देशकालौ परामृष्य यत् कृतो मन्त्रिभिर्नयः।

अवश्यमेव तनुते विविधं फलसम्भवम्।।205।।इति।

मन्त्रिणा पूर्वरचितं स्मरणीयम् ––

उपायान्ननु यत्किञ्चिद् रचितं सदसि स्मरेत्।

तेन सञ्जायते दार्ढ्यं नयकर्मणि चेतसि।।206।।

–– इति नयसारानुसारात्।

(अविचारितं न कर्त्तव्यम्)

अविचारितं कर्म किमपि न कुर्यात्। तदुक्तं नयसारे ––

कर्माविचारितं किञ्चिन्न कुर्याद् बुद्धिमानपि।

क्रियमाणेन तेन स्याच्छुभं वा चाशुभं फलम् ।।207।।इति।

कर्त्तव्याकर्त्तव्ये परं विमृष्यैव कार्यं कर्त्तव्यमिति नाना-नयतन्त्रम् --

सुलभा सर्वसम्पत् स्यात्, तस्य राज्ञश्च तद्धनम् ।। 208 ।।

नयलोचने–

सुजीर्णमन्नं, सुविचक्षणः सुतः,
सुशासिता स्त्री, नृपतिः सुसेवितः।
सुचिन्त्य चोक्तं, सुविचार्य यत् कृतं
सुदीर्घकालेऽपि न याति विक्रियाम् ।। 209 ।। इति।
सुविचारितकार्येषु विपत्ति र्नास्ति[1], दृश्यते।
नहि पथ्यानि यो भुंक्ते व्याधिना स च पीड्यते ।। 210 ।।

– इति नयचन्द्रानुसारात्।

(प्रत्युत्पन्नमतिः श्रेष्ठः)

नयचन्द्रे--

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते, यद्भविष्यो विनश्यति।। 211 ।। इति।

(नष्टे वीरे तद्गुणकीर्त्तनम्)

नयसारे--

विनष्टे सचिवे स्वामिभक्ते वीरे विचक्षणे।
सूचनीयं च सततं मन्त्रिभिः सदसि स्वयम्।।212 ।। इति।

वीराणां निधने राज्ञा मन्त्रिणा चानुशयः कर्त्तव्यः। तथाहि –

नयसारे --

संग्रामे निहतानां तु वीराणामुत्कयेद् गुणान्।
महीपतिः सुमन्त्री च तेनान्यः स्नेहवान् भवेत् ।। 213 ।। इति।
सुहृद्विनाशकार्येषु न कदाचित् प्रवर्त्तते।
सुधीरत्यन्तविश्वासहानिः संजायते सुहृत्[2] ।। 214 ।।

--इति नयलोचनकारः।

---

1. 'विपत्ति र्नहि' इति पाठः समुचितः प्रतिभाति। अथवा 'इति' – पदाध्याहारेण अन्वयः कार्यः।

2. 'सुहृद्' इत्यस्य स्थाने 'अन्यथा' इति पाठोऽर्थसाङ्गत्याय कल्पनीयः।

(मन्त्रणा सदैव)

सदा विमर्शयेद् वैरं प्रहेयश्च चरो नृपैः ।

विरमेन्मन्त्रणायास्तु सचिवो न कदाचन ।। 215 ।।

(मित्रता)

मन्त्रिणा राज्ञा वा सर्वत्र मित्रं कर्त्तव्यमिति नाना–नयतन्त्रम् । तथा हि नयलोचने ––

मित्रं सर्वत्र कर्त्तव्यं मन्त्रिणा भूतिमिच्छता ।

तेन संजायते सन्धिः शत्रौ सप्ताङ्गसङ्गतः ।। 216 ।। इति ।

भारते –––

मित्रं मित्रञ्च मित्रञ्च बोद्धव्यं ते विकर्मणः ।। 217 ।। इति ।

(दुष्टसैनिकशासनम्)

यदि सैनिकानां दुष्टता राज्ञा मन्त्रिणा चोपलभ्यते तदा तेषां प्राणशान्ति र्विधेया । तथाहि नयसारे ––

दुष्टानां सैनिकानां तु महीशेषु च मन्त्रिषु ।

दुष्टत्वं लभ्यते शीघ्रं तदा शान्तिं प्रयोजयेत् ।। 218 ।। इति ।

(कालप्रभावः)

कालवशादेव सर्वं जायते । तथाहि नयचन्द्रे –––

कालः समविषमकरः, परिभवसम्पादकः कालः ।

कालः करोति पुरुषं, दातारं याचितारं च ।। 219 ।। इति ।

भारते सात्यकिं प्रति दुर्योधनवाक्यम्––––

क्व सा क्रीड़ा गतास्माकं बाल्येन शिनिपुंगव[1] !

क्व च युद्धमिदं भूयः कालो हि दुरतिक्रमः ।। 220 ।। इति ।

---

1. 'शिनि' – नामको यादववीरः, तन्नप्ता सात्यकिः ।

नयचन्द्रे--

भवितव्यं भवत्येव कर्मणां गतिरीदृशी।

दासो यथा हरिश्चन्द्रः, सीता नीता निशाचरैः ।। 221 ।। इति।

अन्यच्च --

[1]समा सम्पद्यते बुद्धिः सा मतिः सा च भावना।

सहायास्तादृशा एव यादृशी भवितव्यता।। 222 ।। इति।

नयसारे --

अवश्यं भाविनो भावा भवन्ति महतामपि।

नग्नत्वं नीलकण्ठस्य महाहि-शयनं हरेः।। 223।। इति।

न भाषते सतां दुःखं न शृणोति विरोधिताम्।

न कुर्याद् द्वेषकलहं न वागालिङ्गनं च न।। 224।।

-- इति नयसारे ।

(राज्ञो विरुद्धं नाचरणीयम्)

राज्ञां विरुद्धं सर्वथा नाचरेत्। तदुक्तं नयसागरे--

अपथ्यं नाचरेद् विद्वान् सर्वथा नृपतेः स्वयम्।

रोषान्नरपति र्नूनं सारं प्राणाँस्त्वपाहरेत् ।। 225।। इति।

नयलोचने --

नरेन्द्रं नावमन्येत ब्राह्मणान्नोपतापयेत्।

न शूरेण समं क्रीड़ेन्न च कीड़ेद् भुजङ्गमैः ।। 226।। इति।

क्रुद्धे च राज्ञि नोत्तरं देयम् --

राज्ञि भर्त्तरि चौरे च बहुवित्ते तपोधने।

प्रकुप्ते नोत्तरं दद्यादाचार्ये च गुरौ तथा।। 227।।

-- इति नयचन्द्रानुसारात्।

---

1. पद्यमिदं प्रकारान्तरेणपि प्राप्यते –

मतिरुत्पद्यते तादृग् यादृशी भवितव्यता।

सहायास्तादृशा एव व्यवसायोऽपि तादृशः।।

यदि समं बलं स्यात् तथापि स्पर्धा कर्त्तुं न युज्यते।

राजा लोकपालांशतया दुर्धर्षो भवति। तथाहि——

लोकपालांशतो राजा दुर्धर्षः स्यात् सदा प्रभुः।
तेन स्पर्धां न कुर्वीत यदीच्छेत् सिद्धिमात्मनः।। 228।।

—— इति नयसारात्।

(परोपकारः)

परोपकारार्थं मरणमपि समीचीनमेव। तदुक्तं नयचन्द्रे ——

अवश्यं मरणं पुंसां धात्रायत्तं तु केवलम्।
परार्थं मरणं यत्तु जीवनादतिरिच्यते।। 229।। इति।

(पौरुषापेक्षा)

सर्वत्र कार्यकरणे पौरुषापेक्षापि। यतः ——

केनचिद् भाग्ययुक्तेन दृष्ट्वापि निधिमग्रतः[1]।
न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते।। 230।।

—— इति प्रपञ्चतन्त्रे।

(राज्ञः कर्त्तव्यम्)

राजकर्त्तव्यतामाह ——

मान्यं शिष्टं गुरुं वृद्धं श्वश्रूं श्वशुरमेव च।
नमस्कुर्यात् प्रथमतः परिव्राजं नरोत्तमम् ।। 231।। इति।

भारते ——

विद्यावृद्धान् सदैवाप्तानुपासीथा युधिष्ठिर !
शृणुयास्ते च यद् ब्रूयुः कुर्याश्चैवाविचारयन् ।।232।।
प्रातरुत्थाय तान् राजन् पूजयित्वा यथाविधि।
कृत्यकाले समुत्पन्ने पृच्छेथाः कार्यमात्मनः ।।233।।
ते चैवं पालिता राजँस्त्वया कार्यहितार्थिना।
प्रवक्ष्यन्ति हितं तात ! सर्वथा तव भारत !।।234।। इति।

---

1. 'दृष्टोऽपि निधिरग्रतः' इत्येव पाठः समुचितः प्रतिभाति।

नयचन्द्रे --

पुरस्कृतस्य शिष्टस्य पुरतः सर्वथाचरेत्।

पुरस्कारं वितनुते सुमन्त्री सुनृपं परम् ।। 235 ।।

-- इति नयलोचनानुसारम्।

गुरोरपकृते देयं कोमलं सदृशोत्तरम्।

तेन संजायते हर्षो मानसे सद्गुरो र्महान् ।।236 ।।

-- इति मनुवचनात् ।

(राज्ञो दण्डधरत्वम्)

नारदः --

धर्मैकतानाः पुरुषा यदासन् सत्यवादिनः।

तदा न व्यवहारोऽभून्न द्वेषो न च मत्सरः ।। 237 ।।

नष्टे धर्मे मनुष्याणां व्यवहारः प्रकीर्त्तितः।

द्रष्टा च व्यवहाराणां राजा दण्डधरः स्वयम् ।। 238 ।। इति।

दण्डधर इत्यनेनोद्धतशासकत्वमुक्तम् ।उद्धतशासनेन अदृष्टोत्पत्ति र्भवति। तदाह याज्ञवल्क्यः --

यो दण्ड्यान् दण्डयेद् राजा सम्यग् वध्यॉंस्तु घातयेत्।

इष्टं स्यात् क्रतुभिस्तेन सहस्रशतदक्षिणैः[1] ।। 239 ।।

इति सञ्चिन्त्य नृपतिः क्रतुतुल्फलं पृथक्।

व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहम् ।। 240 ।। इति।

व्यवहारदर्शने सभायां राज्ञ उपवेशनप्रकारमाह कात्यायनः --

विनीतवेषो नृपतिः सभां गत्वा समाहितः।

आसीनःप्राङ्मुखो भूत्वा पश्येत् कार्याणि कर्मिणाम् ।।241। इति।

---

1. 'समाप्तवरदक्षिणैः' -- इति याज्ञवल्क्यस्मृतिपाठः – आचाराध्यायः – 359-60.

(सभ्याः)

सभ्यानाह स एव ——

स तु सभ्यैः स्थिरै र्युक्तः प्रज्ञामूलै र्द्विजोत्तमैः।
धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैः ।। 242 ।।
सप्राड्विवाकंः सामात्यः सब्राह्मण—पुरोहितः।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः ।। 243 ।। इति।

(आवश्यक—कठोरशासनम्)

धर्माविरोधितया उद्धतशासनेन गुणा अपि भवन्ति——

राजा धर्मसहायस्तु द्वयो र्विवदमानयोः।
सम्यक् कार्याण्यवेक्षेत राजदोषविवर्जितः ।।244 ।।
धर्मेणोद्धरतो राज्ञो व्यवहारान् कृतात्मनः।
सम्भवन्ति गुणाः सप्त सप्तबाहुरिवार्चिषः ।। 245 ।।
धर्मश्चार्थश्च कीर्त्तिश्च लोकपङ्क्तिरनुग्रहः।
प्राजाभ्यो बहुमानश्च स्वर्गे स्थानं च शाश्वतम् ।। 246 ।।
तस्माद्धर्मासनं प्राप्य राजा विगतमत्सरः।
समः स्यात् सर्वभूतेषु विभुत्वैरयुतं व्रतात् ।। 247 ।।

—— इति नारदस्वरसात्।

(व्यवहारनिरीक्षणे धार्मिको नियोज्यः)

स्वस्य व्यवहारदर्शनासामर्थ्ये तत्क्षमो धार्मिको ब्राह्मणो नियोज्यः।

तदाह कात्यायनः ———

यदा कार्यवशाद् राजा, न पश्येत् कार्यनिर्णयम्।
तदा नियुज्याद् विद्वांसं ब्राह्मणं वेदपारगम्।। 248 ।।
दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरम्।
परत्र भीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितम्।। 249 ।। इति।

क्षमब्राह्मणाभावे क्षत्रियास्तदभावे वैश्या नियोज्याः। तदाह स एव ---

यदि विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत्।

वैश्यं वा धर्मशास्त्रज्ञं, शूद्रं यत्नेन वर्जयेत् ।। 250।। इति।

मनुरप्याह --

यस्य राज्ञस्तु कुरुते शूद्रो धर्मविवेचनम्।

तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः।।251।। (मनुः–8–21)

व्यासोऽपि --

राजा कार्याणि पश्येद्वै प्राड्विवाकोऽथवा द्विजः।

न्यायाङ्गान्यग्रतः कृत्वा सभ्यशास्त्रमते स्थिरः ।। 252।।

इति महाराजाधिराज – भूमहेन्द्र – श्री श्रीमन्माधव सिंह –

बहादुर प्रमोदाय श्रीभवनाथशर्मणा

संगृहीतो राजनीतिसारः

।। समाप्तः ।।

राजनीतिसारे चर्चिता ग्रन्था ग्रन्थकाराश्च

क्र.सं.	ग्रन्थाः/ग्रन्थकाराः	श्लोकसंख्या
1.	(अनिर्दिष्टनामकाः)	9, 66, 92, 93, 117, 128, 176, 195, 197, 208, 222, 231,
2.	अमरसारः	35
3.	कात्यायनः	241—243,248—250
4.	त्रिकाण्डशेखरः	12
5.	नयचन्द्रः	26—33, 40, 41, 44, 46, 61—63, 69, 77, 80, 133, 157, 162, 165—167, 169, 170, 178, 179, 184, 185, 187, 188, 190, 191, 196, 200, 202, 210, 211, 219, 221, 227, 229, 235
6.	नयतन्त्रम्	127
7.	नयप्रकाशः	21, 49, 53, 85, 139, 149
8.	नयप्रदीपः	164
9.	नयलोचनम्	6—8, 10, 19, 36, 42, 54, 55, 65, 66, 72, 78, 81, 83, 95, 97, 78, 102, 104, 105,114, 121, 130—132, 135—137, 143, 146, 152—154, 159, 182, 203, 209, 214, 216, 226.
10.	नयसागरः	73, 74, 88, 225
11.	नयसारः	2, 4 , 5, 16—18, 20, 22—25, 34, 37— 39, 43, 45, 47, 48, 52, 56, 59, 67, 70, 76,84, 86, 90, 91, 96, 99, 100, 101, 103, 106—110, 113, 116, 120, 122—126, 129,

		134, 138, 140, 141, 144, 145, 147, 148, 150, 151, 155, 156, 158, 160, 161, 163, 168, 170–173, 180, 181, 183, 186, 189, 192–194, 199, 201, 205, 206, 207, 212, 213, 215, 223, 224, 228,
12.	नारदः	237, 238, 244–247
13.	पुरुषपरीक्षा(विद्यापतिः)	11, 71
14.	प्रपञ्चतन्त्रम्	230
15.	बृहन्नाटकम् (महानाटकम्)	60
16.	भारतम्	3, 13, 15, 50, 51, 142, 177, 217, 218, 220, 232, 233, 234.
17.	मनुः	57, 236, 251.
18.	माघः	89, 118,
19.	याज्ञवल्क्यः	239, 240
20.	वराहपुराणम्	58
21.	वात्स्यायनः	79
22.	व्यासः	252
23.	व्योषः 75,112.	
24.	सारावली	198
25.	हितोपदेशः(नारायणः)	64, 82, 94, 111, 115, 119, 174, 175, 204.

---0---

राजनीतिसारस्थ–श्लोकानां सूची

श्लोकाः	श्लोकाङ्काः	श्लोकाः	श्लोकाङ्काः
अकाण्डाद् व्याकुलतया	123	इंगिताकार मेधावी	23
अङ्गे नियुज्यमाने	31	इति संचिन्त्य नृपतिः	240
अतिमूर्खस्तु कार्येषु	120	उत्खातान् प्रतिरोपयन्	55
अत्यन्तं नापि शूरस्य	122	उपजापो रिपोः	37
अनागतविधाता च	211	उपदेशो हि मूर्खाणां	119
अनाहूतो विशेद् यस्तु	94	उपायन्ननु यत्किंचित्	206
अनिमित्तं सुधीः	185	उभयायत्तौ विनश्येत्तु	198
अनुचित–कर्मारम्भः	126	उशीनरो महाकाव्य	3
अन्तःपुरचरी राज्ञो	98	एकान्ते मुख्यभावेन	138
अन्याप्तेषु विरक्तेषु	159	एको मन्त्री न	17
अपथ्यं नारचरे विद्वान्	225	कथकः सूत्रधारः	7
अपराधानुसन्धानं	182	कपटान्नास्त्यधर्मो	57
अभ्रच्छाया हि सुखं	61	कर्त्तव्या सदसि रुषा	101
अमात्यस्तादृशः	102	कर्माविचारितं किञ्चिन्न	207
अमात्यानुपधा	14	काणेन चक्षुषा	71
अरिदुर्गमदुर्गेषु	106	कामुकं मृगयासक्तं	156
अलसं मुखरं	38	कालः समविषमकरः	219
अवधानपरेणैव	96	कालातिपातो नो कार्यः	202
अवश्यंभाविनो भावाः	223	कुटिलो व्याचरन्	137
अवश्यं मरणं पुंसां	229	कुड्यादिषु प्रयुञ्जीत	86
अस्थानं चैव पैशुन्यं	63	कुराजराज्ये	41
आज्ञातः प्रविशेदन्तः	163	कुलशीलगुणोपेतः	22
आज्ञाभङ्गं रणाद्	149	कृतकं कलहं कुर्याद	146
आज्ञाभङ्गो नरेन्द्राणां	125	कृतानुकीर्त्तनं	53
आत्यन्तिकाद् कारणाद् वा	187	केनाचिद् भाग्ययुक्तेन	230
आदानस्य प्रदानस्य	203	केनापि कस्यचित्	76
आदौ गौरवमाधेयं	165	कोपात् प्रतिज्ञां	162
आयुर्वेदकृताभ्यासः	25	कोषस्य संचये	142

श्लोकाः	श्लोकाङ्काः
कौचर्यं कुरुते	136
कौतुकासक्तमनसा	124
क्रुद्धो दुष्टश्च	84
क्व सा क्रीडा	220
क्षणैकमपि नाज्ञासु	169
गिरिदुर्गं महीदुर्गम्	6
गुरोरपकृते देये	236
चलत्येकेन पादेन	111
चिकित्सा व्याधि	26
चिन्तितं मनसा	46
चीयते बालिशस्यापि	9
जीव्येनैव विरक्ता ये	158
तत्रापि ये पुमांसः	168
तपस्विलिङ्गिनो	66
तस्माद्धर्मासनं प्राप्य	247
तस्य द्वाराणि	14
ताडितेनैव दूतेन	166
तुल्यार्थं तुल्यसामर्थ्यं	85
तुल्येऽपराधे स्वर्भानु	118
ते चैवं पालिता	234
त्यजेत् स्वामिन	39
दान्तं कुलीनं मध्यस्थ	249
दुर्जनैरुच्यमानानि	177
दुर्धर्षादपि	43
दुष्टानां सैनिकानां तु	218
दृष्टिरेव तथा क्रूरा	130
देवराजविभूत्यर्थ	2
देशकालौ परामृष्य	205
देशकाल-विधान	20
दैतेयराजमन्त्री	4

श्लोकाः	श्लोकाङ्काः
दोषाश्च मन्त्रभेदस्य	51
द्वारेषु द्विरदा धेया	105
द्विजस्तु सचिवः	16
द्विप्रकाराः प्रकृतयो	10
धर्मश्चार्थश्च कीर्त्तिश्च	246
धर्मेणोद्धारतो राज्ञो	245
धर्मैकतानाः पुरुषाः	237
ध्रियते यावदेकोऽपि	89
न कोपयेद्धरानाथं	184
नग्नो योगी कपाली	69
न तीक्ष्णतानुसर्त्तव्या	116
नन्दनीया प्रजा	180
न भञ्जयेदीश्वरस्य	181
न भाषते सतां दुःखं	224
न मन्त्रयेद्	49
नरेन्द्रं नावमन्येत	226
न लंघयेद गौरवतो	186
न विश्वसेदविश्वस्ते	115
नष्टे धर्मे मनुष्याणां	238
न संशयमनारुह्य	64
न स्थातव्यं न गन्तव्यं	127
नाकस्माद्धसितव्यं	129
नात्यन्तं मृदुना	117
नानादेशाचार	65
नामशून्यन्तु	74
निगूढार्था शुभां	132
नियोगिनस्तु	21
निरपेक्षो न कर्त्तव्यः	204
निरूपणं परामर्षो	112
निर्णीतं व्याजगर्भं	56
निष्प्रयोजन माह्वानं	148

श्लोकाः	श्लोकाङ्काः	श्लोकाः	श्लोकाङ्काः
निस्वमक्षरतः क्रूरं	157	बलवच्छत्रुनाशेषु	200
निहन्युः सर्वथा	82	बलावसादं शत्रोर्वा	191
निह्नवे च यथा	70	बलीयसि रिपौ मन्त्री	133
निह्नवं कुरुते	47	बालादपि सुभाषितम्	8
नीचरक्तः सुरासक्तः	92	बुद्ध्यैव सचिवोऽवेक्षां	95
नीतिस्तु चतुरा	121	भवितव्यं भवत्येव	221
नेतव्या हि सदाज्ञा	170	भवितव्यं सदा मन्त्रि	97
नैकाकी निर्णयं	11	भूभुजा मन्त्रिणा नीति	103
पण्डितेषु गुणाः	33	भेतव्यं हि सदा	134
पत्यौ प्रसन्ने	144	भेदो दण्डः	35
परभूमिप–दुर्गेषु	161	मन्त्रणायां कृतायां तु	58
परशिष्टात्मनो	145	मन्त्रभेदे हि ये	50
परस्य लक्ष्मी सुधिया	78	मन्त्रमूलं यतो राज्य	90
परिव्राड् धर्मशास्त्रज्ञः	93	मन्त्र संगोपनं	36
परोक्षे कार्यहन्तारं	59	मन्त्रिणा तु कृता	54
पिता पितृसमः	28	मन्त्रिणः पुरतः शश्वन्	160
पितृवैरं धरावैरं	167	मन्त्रिणः सर्वदा राजा	147
पुरं च ते	13	मन्त्रिणां पुरतो राजा	113
पुरस्कृतस्य शिष्टस्य	235	मन्त्रिदोषे न दृष्टिं वा	183
प्रजा प्रकृतयः	12	मन्त्री तु गोचरं	150
प्रजां संरक्षति नृपः	179	मन्त्री स्वातन्त्र्यमत्युग्रं	154
प्रतापः सुचिता	34	मान्यं शिष्टं गुरुं	231
प्रतिज्ञापूर्त्तिपर्यन्तं	189	मारणं तापनं शत्रोः	87
प्रतिमन्त्रिणि सन्मन्त्री	75	मित्रं मित्रञ्च	217
प्रतिराजपुरं रुन्ध्यात्	107	मित्रं सर्वत्र कर्त्तव्यं	216
प्रशंसामात्मनो वाऽपि	77	मुख्यविरोधिहिंसैव	81
प्रस्तावेऽनुग्रहो राज्ञः	176	मुख्यैर्महीभृतः	99
प्राकारान् परितुष्टा	104	मूलवैरिणमासाद्य	83
प्राज्ञे नियुज्यमाने	32	मेधावी–वाक्पटुः	24
प्रातरुत्थाय तान्	233	यत्किञ्चित् क्रियते	201

श्लोकाः	श्लोकाङ्काः
यत्नतस्तु गढं	5
यत्रातिरिक्त रोषेण	108
यदा कार्यवशाद् राजा	248
यदि न स्यान्नरपतिः	178
यदि राजा महत्प्रेम	192
यदि राजा स्वयं स्नेह	193
यदि विप्रो न विद्वान्	250
यदि स्यान्मन्त्रणा	52
यस्य राज्ञस्तु कुरुते	251
युक्त्या तत्प्रति	91
युक्त्या संकेतयेन्मन्त्री	188
ये स्यु र्वरिष्ठा	81
यो दण्ड्या दण्डयेद्	239
राजा कार्याणि पश्येत्तु	252
राजा तु गोचरं	152
राजा तुष्यति वसुना	79
राजा धर्मसहायस्तु	244
राजायत्ताः प्रजाः सर्वाः	196
राज्ञः पुरो विसंवादि	80
राज्ञश्च कटुभाषित्वं	128
राज्ञि भर्त्तरि चारे च	227
लावण्यभूषणाक्रान्तां	109
लोकपालांशतो राजा	228
वचस्त्ववसरं प्राप्य	131
वणिजो मन्त्रकुशलान्	68
वरं हयराज्यं	40
वर्त्तमानं वने	88
वार्तां नानाविधां श्रुत्वा	171

श्लोकाः	श्लोकाङ्काः
विनीतवेषो नृपतिः	241
विफलेऽपि मन्त्रजाते	110
विवस्वानिव तेजोभिः	67
विशिष्याज्ञातसंस्थानो	72
विशुद्धदेशे कालेन	190
विसंन्धाने यदा	164
वेदवेदार्थतत्त्वज्ञो	30
शंकितव्यो हि सौमित्रे	60
शिष्टायत्ति नृपायत्तिः	195
शिष्टयत्तौ क्रमाच्छिष्टः	197
शुभे मुहूर्ते	45
श्रीमन्माधव सिंहस्य	1
संग्रामे निहतानां तु	213
संहतिः श्रेयसी	62
सकृतदुक्तगृहीतार्थो	29
स तु सभ्यैः स्थिरैः	242
सदा विमर्शयेद् वैरं	215
सन्धिविग्रह	18
सप्राड्विवाकः सामात्यः	243
समस्तशास्त्र	27
समा सम्पद्यते बुद्धिः	222
सम्पदां हेतुरुत्कृष्टा	42
सम्प्रष्टव्योऽर्थे सन्देहे	143
सर्वज्ञं सचिवं	19
सर्वथा गोपयेन्मन्त्री	73
सर्वथा राजतो मन्त्री	139
सावशेषं नृपो	151

श्लोकाः	श्लोकाङ्काः
विज्ञानगुणसम्पन्नं	172
विद्यावृद्धान् सदैवा	232
विनष्टे सचिवे स्वामि	212
सुलभा सर्वसम्पत्	208
सुविचारित कार्येषु	210
सुहृद्विनाशकार्येषु	214
सेवितव्यो महान् वृक्षः	174
स्तब्धो जिह्मः	48
स्तुतिभिः शश्वदाशीर्भिः	141
स्मरणीया स्वामिगुणाः	100
स्वकीयेष्वपि वर्गेषु	114
सुजीर्णमन्नं	209
सुधर्मपुरुषद्वारा	173
सुप्रयोगकृता	44
स्वतन्त्र एव राजा स्यात्	155
स्वतन्त्रो नृपतिः	135
स्वेच्छया दानभोगाभ्यां	153
स्वोत्कर्षं कुरुते मन्त्री	199
हीनसेवा न कर्त्तव्या	175
हृदये यदि वैषम्यं	194
हृदयेन समं शिष्टैः	140